लाक्षय वर्णात्। ... प्रत्ययांतवर्जात् इदंतात् स्त्रियां डीर्वास्यात्। भूमी
भूमिः। धूली धूलिः। अ ... इति किं। कृतिः। अकरणिः हानिः॥३३ पद्ध
तेः। अस्मात् स्त्रियांडीर्वास्यात्। पद्धती पद्धतिः॥३४ शक्तेः शस्त्रे। अस्मा
च्छस्त्रे स्त्रियांडीर्वास्यात्। शक्ती शक्तिः। शस्त्रइतिकिं। शक्तिः सामर्थ्यं॥३५ स्वरादुतो गुणादखरोः। स्वरात्परो यउकारस्तदंतात् गुणवचनात् खरुवर्जात् स्त्रियांडी
र्वास्यात्। पट्वी पटुः। विभ्वी विभुः। स्वरादितिकिं। पांडुर्भूमिः। गुणादितिकिं। आखुः स्त्री। अखरोरितिकिं। खरुरियं॥३६ श्येतैतहरितभरतरोहिता
द्वर्णात्तोनश्च। एत्यो वर्णवाचिभ्यः स्त्रियांडीर्वास्यात् तद्योगे तस्य नश्च। श्येनी श्येता। एनी एता। हरिणी हरिता। भरणी भरता। रोहिणी रोहिता। वर्णादिति
किं श्येना एता॥३७ क्तः पलितासितात्। तइति वितिवा ... तत्र्याभ्यां स्त्रियांडीर्वास्यात्। न ... पलिक्नी पलिता। असिक्नी असिता॥३८
सहनञ्विद्यमानपूर्वपदा ... गादक्रोडादिभ्यः। सहादिवर्जपूर्वपदं यदंगं तदंतात् क्रोडादिवर्जाददंतात् स्त्रियांडीर्वास्यात्। पीन ...
केशी। अतिकेशा मालाः। सहादिवर्जनेकिं। सहकेशा। अकेशा। विद्यमानकेशा। क्रोडादिवर्जनेकिं। कल्याणक्रोडा। पीन ...

फा[illegible] या॥४९॥ नासिकोदरोष्ठजंघादंतकर्णशृंगाङ्गगात्रकंठात्॥ सहादिवर्जपूर्वपदा[illegible]
[illegible] सिकी तुंगनासिका॥ कृशोदरी कृशोदरा॥ बिंबोष्ठी बिंबोष्ठा॥ दीर्घजंघी दीर्घजंघा॥ [illegible] दंती समदंता॥ चारुकर्णी [illegible]
शृंगी [illegible] मृदंगी मृदंगा॥ सुगात्री सुगात्रा॥ सुकंठी सुकंठा॥ पूर्वेण सिद्धे नियमार्थं मिदं तेन बह्वचः [illegible] योगे [illegible] स्यो [illegible] सुलक्षणा[illegible]
॥४०॥ नखमुखात् संज्ञायां॥ सहादिवर्जपूर्वपदात् स्वांगात् स्यामसंज्ञायामेव स्त्रियां ङीष् स्यात्॥ शूर्पणखी॥ [illegible] चंद्रमुखी [illegible] मुखा॥
[illegible] नाम्नीति किं॥ शूर्पणखा॥ कालमुखा॥४१॥ पुच्छात्॥ सहादिवर्जपूर्वपदात् स्वांगात् पुच्छात् स्त्रियां ङीष् वा स्यात्॥ दीर्घपुच्छी [illegible]॥४२॥ कबर[illegible]
[illegible] पूर्वपदात् पुच्छात् स्त्रियां ङीष् नित्यं स्यात्॥ कबरपुच्छी मणिपुच्छी॥ वि[illegible] षपुच्छी॥ शरपुच्छी॥४३॥ प[illegible]मानाद[illegible]
[illegible] ङीष् स्यात्॥ उलूकपक्षी शाला॥ उलूकपुच्छी सेना॥४४॥ क्रीतात् करणादे[illegible] ः॥ करणादेः क्रीतांतात् [illegible] स्त्रियां ङीष् [illegible] श्वक्रीती॥ करणादेरिति किं
॥ अश्वेन क्रीता॥४५॥ क्तादल्पाख्यायां॥ क्तांतात् करणादेः अल्पेऽर्थे स्त्रियां ङीष् स्यात्॥ अत्र विलिप्ती द्यौः॥ [illegible] अल्प[illegible]इति किं॥ चंदना
नुलिप्ता स्त्री॥४६॥ स्वांगाद्दस्कृतमितजातप्रतिपन्नाद् बहुव्रीहेः॥ स्वांगा[illegible] देः कृतादिवर्जक्तांताद् बहुव्रीहेः स्त्रियां ङीष् स्यात्॥ ऊरुभिन्नी [illegible]॥
कृतादिवर्जने किं॥ दंतकृता॥ दंतमिता॥ दंतजाता॥ दंतप्रतिपन्ना॥४७॥ अनाच्छा[illegible] दजात्या दर्नवा॥ आच्छादवर्जया जातिस्त्रदवययात्॥ [illegible] कृतादिवर्जक्तांता [illegible] बहु
व्रीहेः स्त्रियां ङीष् वा स्यात्॥ शांर्गरजग्धी॥ शांर्गरजग्धा॥ आच्छादवर्जने किं॥ वस्त्रच्छन्ना॥ जात्यादेरिति किं॥ मासयाता॥ अक्तांतादित्येव [illegible]
[illegible] बहुव्रीहेः स्त्रियां ङीष् वा स्यात्॥ तद्योगे नतस्य च॥ दृढपत्नी॥ दृढपतिः॥ कुरुपत्नी [illegible] बहुस्थूलपतिः पुरी॥४९॥ सादेः सपूर्वस्य [illegible] त्संज्ञा [illegible]
[illegible] स्यात्॥ तद्योगे नतस्य च॥ ग्रामपत्नी॥ ग्रामपतिः॥ सादेरिति किं॥ पतिरियं ग्रामस्य पतिरित्यर्थः॥५०॥ सपत्न्यादौ॥ एषु पतिशब्दात् स्त्रियां ङीप् स्यात्॥ [illegible] तस्य
[illegible] पत्नी [illegible]॥५१॥ पत्युर्नो यज्ञसंयोगे॥ परिणीतायां ङीप् स्यात्॥ ब्राह्मणस्य पत्नी॥ वृषलस्य पत्नी॥५२॥ पाणिगृहीती नीति॥ पाणिगृहीता तिष्ठ[illegible]कायाः यांतं निपा
त्यंते॥ पाणिगृहीती॥ करगृहीती॥ ऊढाया मित्येव॥ पाणिगृहीतान्या॥५३॥ पतिवत्न्यंतर्वत्न्यौ [illegible] निपात्येते॥ [illegible] विधवा [illegible]॥ [illegible] निपातयतः॥ २२

[illegible] मति [illegible] अनडुही [illegible] ङाति [illegible]
[illegible] ग्रामान् [illegible] १२

[illegible] निपात्येते॥५४॥ जातेरस्त्रीविषयादयोपधात्॥ जातिवाचिनो ऽदंतात् स्त्रियां ङीष् स्यात्॥ न तु यांतान्नित्यस्त्रीशूद्रात्॥ कुक्कुटी॥ वृषली॥ नाडायनी॥ कठी॥ अ
नेरिति किं॥ मुंडा योगादिवर्जने किं॥ क्षत्रिया [illegible] शूद्रा॥ आर्येत्येव॥ आखुः॥५५॥ पाककर्णपर्णवालांतात्॥ पाकाद्यंताज्जातेः [illegible] स्त्रियां ङीष् स्यात्॥
ओदनपाकी॥ आखुकर्णी॥ मुद्गपर्णी॥ गोवाली॥ जातेरित्येव॥ बहुपाका यवागूः॥५६॥ असत्काण्डप्रांतशतैकेभ्यः पुष्पात्॥ सदादिवर्जेभ्यः परो यः पुष्प
शब्दस्तदंताज्जातेः स्त्रियां ङीष् स्यात्॥ शंखपुष्पी॥ सदादिवर्जने किं॥ सत्पुष्पा॥ कांडपुष्पा॥ प्रांतपुष्पा॥ शतपुष्पा॥ एकपुष्पा॥ प्राक्पुष्पा॥५७॥ असंसम्भा
जिनैकशणपिंडेभ्यः फलात्॥ समादिवर्जेभ्यः परः फलशब्दस्तदंताज्जातेः स्त्रियां ङीष् स्यात्॥ दासीफली॥ समादिप्रतिषेधः किं॥ संफला॥ भस्त्राफला॥ अजिनफ
ला॥ एकफला॥ शणफला॥ पिंडफला॥ त्रिफला॥५८॥ अनञो मूलात्॥ नञ्वर्जात् परो यो मूलशब्दस्तदंताज्जातेः स्त्रियां ङीष् स्यात्॥ दर्भमूली॥ शर्वमूली॥ अ
नञ इति किं॥ अमूला॥५९॥ धवाद्योगात्पालकांतात्॥ धवोऽत्र [illegible] न॥ संबंधात्॥ [illegible] पालकांतवर्जात् ङीष् स्यात्॥ प्रष्ठी गणका॥ धवा
दिति किं॥ प्रसूता॥ योगादिति किं॥ देवदत्तो धवः॥ देवदत्ता स्त्री स्वतः॥ अपा
लकांतादिति किं॥ गोपालकस्य स्त्री॥ गोपालिका॥ आदित्यव॥ मदिरा॥
स्त्री [illegible]॥६०॥ पूतक्रतुवृषाकप्यग्निकुसितकुसीदाद ऐ॥ एभ्यो धववा चिभ्यो योगात् स्त्रीवृत्तिभ्य ऐ स्यात्॥ ङीयोगे चैषामेते [illegible] पूतक्रतायी॥
वृषाकपायी॥ अग्नायी॥ कुसितायी॥ कुसीदायी॥६१॥ मनोरौ च वा॥ धववाची यो मनुस्तस्माद्योगात् स्त्रीवृत्तेर्ङीष् वा स्यात्॥ ङीयोगे चास्य औरैकारान्तस्य॥ मनावी॥ मनायी॥ मनुः॥६२॥
वरुणेंद्रभवशर्वरुद्रमृडादानुक् चांतः॥ एभ्यो धववाचिभ्यो योगात् स्त्रीवृत्तिभ्यो ङीष् स्यात्॥ ङीयोगे चानुगंतः॥ वरुणानी॥ इंद्राणी॥ रुद्राणी॥ भवानी॥ शर्वाणी॥ मृडा
नी॥६३॥ मातुलाचार्योपाध्यायाद्वा॥ एभ्यो धववाचिभ्यो योगात् स्त्रीवृत्तिभ्यो ङीष् स्यात्॥ ङीयोगे चानीता वा॥ मातुलानी॥ मातुली॥ आचार्यानी॥ आचार्या॥ उपाध्याया
नी॥ उपाध्यायी॥६४॥ सूर्याद्देवतायां वा॥ सूर्यशब्दाद्धववाचिनो योगाद् देवतास्त्रीवृत्तेर्ङीष् वा स्यात्॥ ङीयोगे चानंतः॥ सूर्याणी॥ सूर्या॥ देवतायामिति किं॥ मानुषी सूरी॥६५॥
यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे॥ एभ्यो यथायोगं दोषादौ गम्ये स्त्रियां ङीष् स्यात्॥ ङीयोगे चानंतः॥ यवानी॥ यवनानी लिपिः॥ अरण्यानी॥ हिमानी॥६६॥ आर्य
क्षत्रियाद्वा॥ आभ्यां स्त्रियां ङीष् वा स्यात्॥ ङीयोगे चानंतः॥ आर्याणी॥ आर्या॥ क्षत्रियाणी॥ क्षत्रिया॥६७॥ यञश्चाप्॥ यञंतात् स्त्रियां ङीप् स्यात्॥ तद्योगे च [illegible]

[illegible] शरनामी २

य नंतो वास्यात्। गार्गी। गार्ग्यायणी॥६८ लोहितादिशाकलांतात् लोहितादेशाकलांतात्। यञंतात् स्त्रियां डीः स्यात्। लाद्धा। [illegible] डायनंतः। लोहित्यायनी।
शाकल्यायनी॥६९ वावटाद्वा। शांतादवटाद्य यञंतात् स्त्रियां डीर्वा स्यात्। डीयोगे चडायनंतः। पौतिमाष्यायणी। पौतिमाष्या आवट्यायनी आव
ट्या॥७० कौरव्यमांडूकासुरेः। एभ्यः स्त्रियां डीः स्यात्। डीयोगे चायनंतः। कौरव्यायणी। मांडूकायनी। आसुरायणी॥७१ इतः। इकारांतादितंता स्त्रि
यां डीः स्यात्। सातंगमी इत इति किं। कारीषगंध्या॥७२ बहुजातेः मनुष्यजातिवाचिन इदंतात् स्त्रियां डीः स्यात्। [illegible] इत इत्येव। दरद्। उरिति किं।
तित्तिरिः जातेरिति किं। निःकौशाम्बिः॥७३ उतः। आप्राणिजातिवाचिन उदंतात् मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। भद्रबाहुः ब्रह्मबंधू
स्व। कुरूः। ब्रह्मबंधूः। अलाबूः। कर्कंधूः। उत इति किं। वधूः। अप्राणिनश्चेति किं। आखुः। जातेरिति किं। पटुः स्त्री। युरज्ज्वादिवर्जनं किं। अध्व
र्युः स्त्री रज्जुः॥७४ बाह्वंतकद्रुकमंडलोर्नाम्नि। बाह्वंतात् कद्रुकमंडलु स्यां च संज्ञायां स्त्रियामूङ् स्यात्। मद्रबाहूः। कद्रूः। कमंडलूः। नाम्नी
ति किं। वृत्तबाहुः॥७५ उपमानसहितसंहितसहशफवामलक्षणात् ऊरोः। एतत्पूर्वपदादूरोः स्त्रियामूङ् स्यात्। करभोरूः।
सहितोरूः। संहितोरूः। सहोरूः। शफोरूः। वामोरूः। लक्ष्मणोरूः। उपमानादेरिति किं। पीनोरुः॥७६ नारीसखीपंगूश्वश्रू एते ङ्यंता ऊङंता
श्च स्त्रियां निपात्यंते॥७७ यूनस्तिः। यूनः स्त्रियां तिः स्यात्। युवतिः। मुख्यादित्येव। निर्यूनी॥७८ अनार्षवृद्धे णिञो बहुस्वरस्य गुरूपांत्यस्यांतस्य ष्यः अ
नार्षवृद्धे विहितो यो णिञ् तदंतस्य बहुस्वरस्य गुरूपांत्यस्यांतस्य ष्यः स्यात्। कारीषगंध्या। बालाक्या। अनार्ष इति किं। वासिष्ठी। वृद्ध इ
ति किं। आहिच्छत्री। अणिञ इति किं। औपगवी। बहुस्वरस्येति किं। दाक्षी। गुरूपांत्यस्येति किं। औपगवी। अणिञंतस्यैतावत्कुस्वरादिविशेषणं किं
दौवार्यां अङ्गुलायां॥७९ कुलाख्यानां। कुलमाख्या यातयकालिस्तासामनार्षवृद्धे णिञंतानामेतस्य स्त्रियां ष्यः स्यात्। [illegible] गौणिक्या। गौत्या। अना
र्ष इति किं। गौतमी॥८० क्रौड्यादीनां। क्रौडि इत्यादीनामणिञंतानामंतस्य स्त्रियां ष्यः स्यात्। क्रौड्या। लाड्या॥८१ भोजसूतयोः क्षत्रियायुवत्योः। अनयोरंत
स्य यथासंख्यं क्षत्रियायुवत्योः स्त्रियां ष्यः स्यात्। भोज्या क्षत्रिया। सूत्या युवतिः। अन्यात्र भोजा सूता॥८२ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धेर्वा एषा २४

मिञंतानां स्त्रियामंतस्य ष्यो वा स्यात्। दैवयज्ञ्या। दैवयज्ञी। शौचिवृक्ष्या। शौचिवृक्षी। सात्यमुग्र्या। सात्यमुग्री। काण्ठेविद्ध्या। काण्ठेविद्धी॥८३ ष्या पुत्रपत्योः केवल
योरीत् तत्पुरुषे ष्यस्य आबंतस्य पुत्रपत्योः केवलयोः परयोः तत्पुरुषे समासे ईत् स्यात्। कारीषगंधीपुत्रः। कारीषगंधीपतिः। ष्य इति किं। इभ्यापुत्रः। केवल
योरिति किं। कारीषगंध्यापुत्रकुलं॥८४ बंधौ बहुव्रीहौ। मुख्य आबंतः ष्यो बंधौ केवले परे बहुव्रीहावीद्वा स्यात्। कारीषगंधीबंधुः। केवल इत्येव। का
रीषगंध्याबंधुकुलं। मुख्य इत्येव। अतिकारीषगंध्याबंधुः॥८५ मातमातृकमातृकेवा। मुख्य आबंतः ष्यो मातादिषु केवलेषु परेषु बहुव्रीहावीद्वा स्यात्।
कारीषगंधीमातः। कारीषगंध्यमातः। कारीषगंधीमाता। कारीषगंध्यामाता। कारीषगंधीमातृकः। कारीषगंध्यमातृकः॥८६ अस्यां ल्लुक्। अयां परस्य लुक् स्या
त्। मद्रचरी॥८७ मत्स्यस्य यः। मत्स्यस्य यो ङ्यां लुक् स्यात्। मत्सी॥८८ व्यंजनात्तद्धितस्य। व्यंजनात्परस्य तद्धितस्य यो ङ्यां लुक् स्यात्। मनुषी। व्यंजना
दिति किं। कारिकेयी। तद्धितस्येति किं। वैश्यी॥८९ सूर्यागस्त्ययोरीये च। अनयोर्यो ङ्यामीये च प्रत्यये लुक् स्यात्। सूरी। आगस्ती। सौरीयः।
आगस्तीयः॥९० तिष्यपुष्ययोर्णाणि। अनयोर्यो णानि लुक् स्यात्। तैषी रात्रिः। पौषमहः। णाणीति किं। तिष्यश्रवः॥९१ आपत्यस्य
क्यच्व्योः। व्यंजनात्परस्यापत्यस्य यः क्यच्व्योः परयोर्लुक् स्यात्। गार्गीयति। गार्गी यते। गार्गीभूतः। आपत्यस्येति किं। सांकाश्यीयति। व्यंजनादित्येव। कारिके
यायते॥९२ तद्धितये स्वराद्यति। व्यंजनात्परस्यापत्यस्य यो यादावादिवर्जे स्वरादौ च तद्धिते लुक् स्यात्। गार्ग्यः। गार्गकं। आपत्यस्येति किं। कांपील्यकः।
तद्धित इति किं। वात्स्येन। अनातीति किं। गार्ग्यायणः॥९३ बिल्वकीयादेरीयस्य। नडादिभ्यो बिल्वादयः तेषां कीयप्रत्ययांतानामीयस्य तद्धिते लुक् स्यात्। बिल्व
काः। वैणुकाः। बिल्वकीयादेरिति किं। नाडकीयः॥९४ नराजन्यमनुष्ययोरके। अनयोर्यो के परे लुक् न स्यात्। राजन्यकं। मानुष्यकं॥९५ अड्यादेर्गो
णस्याक्विपस्तद्धितलुक्यगोणीसूच्योः। प्रादेः प्रत्ययस्य गोणस्याक्विबंतस्य तद्धितलुकि लुक् स्यात्। न तु गोणीसूच्योः। सप्तकुमारः इंद्रः। पंचयुवा हि पंचशः। गो
णस्येति किं। अवंती। अक्विप इति किं। पंचकुमारी। अगोणीसूच्योरिति किं। पंचगोणिः॥९६ गार्ग्यांतद्धस्तेनैस्मिन्समासे या बहुव्रीहौ। गो [illegible] स्यां ह्रिपागो
र्थांतस्य वांतेवर्तमानस्य ह्रस्वः स्यात्। न त्वदस्यावि सि समासांत ईयसंत बहुव्रीहौ। गोलावा। चित्रगुः। निःकौशांबिः। अतिखट्वः। अतिचरणदेवः। गोणास्यत्य

वा सुगो: राजकुमारी अक्षिपक्ष्मेव। प्रियगो: प्रियकुमारीवेत्र॥ गो स्त्रीति किं। अतितंत्री:। स्त्रैनश्रीति किं। गोकुलं। कन्यापुरं सादिवर्जनं किं। अ
र्धपिप्पली। बहुश्रेयसी ना॥९७ क्लीबे नपुंसकवृत्तेः सूरान्तस्य ह्रस्वः स्यात्। कीलालपं। अतिनुकुलं॥९८ वेद्रुता भव्ययद्गदोस्वडीत्त्वात्पादाईङ्गता।
रुत्तरपदे परहृस्वो वा स्यात्। नवेन्नावच्य यो सृतोऽईयो ह्यस्वा नितावस्यां लक्ष्मिपुत्रः। लक्ष्मीपुत्रः। खलपुपुत्रः। खलपूपुत्रः। अव्यया दिवर्ज
ने किं। कांडीवृत्तं। इंद्रुहूपुत्र॥ कारीषगं धीपुत्रः। गार्गीपुत्रः। श्रीकुलं। भ्रूकुलं॥९९ इयापो बहुलं नाम्नि। ड्यन्तस्याबन्तस्य चोत्तरपदे परसंज्ञायां ह्र
स्वः स्यात्। बहुलं सरणियुप्ता। सरणीगुप्ता। रेवतिमित्र। रेवतीमित्र। शिलवहं। शिलावहं। गंगवद्। गंगावद्। ड्यन्तस्याबन्तस्य परबहुलं ह्र
स्वः स्यात्। रोहिणिवं। रोहिणीवं। अजडं। अजाडं॥१०० त्रुगो ह्रस्वकं सकं घो॥ अनयोः परयो ड्याबन्तस्य ह्रस्वः स्यात्। त्रुकंसः। त्रकंसः। त्रुकुटिः। त्र
कुटिः॥१०१ मालेषीकेष्टकस्यांते पि सारितूलचीत एषां के वलाना मन्तस्थानां वस्तार्यादिषु परेषु यथाक्रमं ह्रस्वः स्यात्। मालसारा। उ
त्पलमालसारा। इषीकतूलं। इष्टकचितं॥२ गोण्या मापे गोण्या मानवृत्तिरूपचारान्मेयवृत्तेर्ह्रस्वः स्यात्। गोणमितागोणिः॥३ आ
दोहृतांक आदीदूतो वकेपत्ययेह्रस्वः स्यात्। पविका मामपकालं दिमिका वधुका॥४ नकवि आदीदूतां कविपरह्रस्वो नस्यात्। बहुकु
मारीकः। बहुकीलालपाको बहुब्रह्मबंधुकः॥५ नवापः। आपः कविपरे ह्रस्वो वा स्यात्। प्रियखट्वकः। प्रियखट्वाकः॥६ इच्चापुंसः। निक्याप्परे आबं
तपाराय स्यात्। बिल क्षिप्तस्मिन् अनिनः प्रत्ययस्यावयवे किपरा पुं लिंगाद्विहितस्यापः स्थाने इकारो वा स्यात्। खट्विका। खट्वका। खट्वाका। अबो
स इति किं। सर्विका। अनिदिति किं। दुर्गका। आप्परे इति किं। प्रियखट्वा कोनाम्। अति प्रियखट्वाकाखी। आपत्येव मातृका॥७ स्वसाजत्स्वा धातुत्यका
ता॥ स्वसंज्ञा सर्वेभ्यो धातुत्यवर्जस्यायाय कोताव्यांतव परस्यापः स्थाने निक्याप्परे इकारो वा स्यात्। स्विका। स्वका। ज्ञिका। ज्ञका। अजिका। अजका। त
त्रिका। तत्रका। इभ्यिका। इभ्यका। वट किका। वटकाका। धातुत्यवर्जनं किं। सुनयिका। सुपाकिका। इहत्यिका। आपत्यवकां पौत्रिका। त्येकस्य
नपुत्रवृंदारकस्य। एषा मन्त्रस्या। निक्याप्परे इर्वा स्यात्। द्विके। द्वके। एषिका। एषका। सूतिका। सूतका। पुत्रिका। पुत्रका। वृंदारिका। वृंदारका॥९ व्रोवर्तिका २४
×अविवर्त्तायस्मा दितिबहुव्रीहि किं×५

नृपाभिगतयोवास्पर्श: मध्ये कृत्य। मध्येकृत्वा। पदेकृत्य। पादेकृत्वा। निवचने कृत्य। निवचने कृत्वा। मनसि कृत्य। मनसिकृत्वा। उरसिकृत्य। उरसिकृत्वा
॥११ उपाजेऽन्वाजे। एतावव्ययो दुर्बलस्य तत्रस्य वा बलाधाना घार्थे कृञ्योगे गतीवा स्यातां। उपाजे कृत्य। उपाजे कृत्वा। अन्वाजे कृत्य। अन्वाजे कृत्वा॥१२
स्वाम्येऽधिः। स्वाम्ये गम्ये अधीत्यव्ययं कृञ्योगे गतिर्वा स्यात्। वित्ते। ग्रामं अधिकृत्य। अधिकृत्वा गतः। स्वाम्ये इति किं। ग्राममधिकृत्य उद्दिश्य इत्यर्थः॥१३ स्था
ने दादि श्रद्धार्थे। पातभ्यार्थे तत्र यो कृञ्योगे गतयोवा स्फः। साक्षात्कृत्य। साक्षात्कृत्वा। मिथ्याकृत्य। मिथ्याकृत्वा॥१४ नित्यं हस्ते पाणावुद्वाहे। एता
वव्यया वुद्वाहे गम्ये कृञ्योगे गती स्यातां। हस्तेकृत्य पाणौकृत्य उद्वाहे इति किं। हस्ते कृत्वा काण्डं गतः॥१५ प्राध्वं बंधे। प्राध्वमित्यव्ययं बंधार्थे कृ
ञ्योगे गतिः स्यात्। प्राध्वं कृत्य बंध इति किं। प्राध्वं कृत्वा शकटं गतः॥१६ जीविकोपनिषदावुपम्ये। एतावौपम्ये गम्ये कृञ्योगे गती स्यातां। जीवि
काकृत्य उपनिषत्कृत्य॥१७ नाम नाम्ना एकार्थ्ये समासो बहुलं नाम नाम्ना मा सहैकार्थ्ये समासो बहुलं स्यात्। लक्ष
णमिदमधिकारश्च। तेन बहुव्रीह्यादिसंज्ञारहितोऽयं तत्र कार्धतात ज्ञानानवसमास्यः विस्पष्टपटुः दारुणाध्यायकः। सर्वचर्मीणोर
थः। कन्या इव। श्रुतपूर्वः। नामेति किं। वरं तिगावो धनमस्य। नाम्नेति किं चैत्रः पचति॥१८ सुज्वार्थे संख्या संख्येये संख्यया बहुव्रीहिः॥ सुज
र्थे वाराधार्थे विकल्पः संशयो वा तद्वृत्तिसंख्या वा विना मसंख्येयार्थेन संख्या नाम्ना सहैकार्थ्ये समासो बहुव्रीहिः स्यात्। द्विदशाः। द्वित्राः। संख्ये
ति किं। गावो वा दश वा। संख्येये इति किं। दश वा गावो वा। संख्ययेति किं। द्विर्वित्रिर्तिर्गावा॥१९ आसन्नादूराधिकाध्यर्धार्धाद्दिपूरणं द्वितीयाद्यन्यार्थे। आसन्ना
दि अर्धपूर्वपदं च पूरणप्रत्ययान्तं नामसंख्या नाम्नैकार्थ्ये समासः स्यात्। द्वितीयाद्यन्तस्यान्यपदस्यार्थे संख्येये वाच्ये स च बहुव्रीहिः। आसन्नदशाः। अ
दूरदशाः। अधिकदशाः। अध्यर्धविंशाः। अर्धपंचविंशाः॥२० अव्ययं अव्ययं नाम संख्या नाम्ना कार्थे समस्यते द्वितीयाद्यन्यार्थे संख्येये वाच्ये स च बहु
व्रीहिः। उपदशाः॥२१ एकार्थं चानेकं च। एकमनेकं वैकार्थं समानाधिकरणमव्ययं च नाम्ना द्वितीयाद्यन्तान्यपदस्यार्थे समस्यते। स च बहुव्रीहिः। आरूढ
वानरो वृक्षः। सुसूक्ष्मजटकेशः॥ अवाङ्मुखः॥२२ उष्ट्रमुखादयः। एते बहुव्रीहि समासा निपात्यंते। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। वृषस्कंधः॥२३

"आदशाः।
संख्या संख्येये
वर्तते न संख्याने।
ततः परं संख्या
संख्येये च। संख्या
ने गणने। संख्येय
गणनीयं द्रव्यं। सं
ख्याय सामानाधि
करण्ये। संख्याय
: संख्या नेतृत्वं
धः स्यात्। दशाद
न्याः अष्टादशा
द्विदित्यर्थः॥

अनुक्तार्थे वर्त्तिकायां इर्वा स्यात्। वर्त्तिका वर्त्तका। यावितिकिं। वर्त्तिका शकुनिः॥ १० अस्यायत्तत्क्षिपकादीनां। यदादिवर्जस्य तोः इः नित्यमपुरः स्यात्। पा
चिका। मद्रिका। अनित्वमित्येव जीवका। आप्परइत्येव। बहुपरिव्राजका। यदादिवर्जनं किं। यका। सका। क्षिपका। ध्रुवका॥ ११ नरिकामामिका। नरिका। मक
योरित्वं निपात्यते। नरिका मामिका॥ १२ तारकावर्णकाष्टका ज्योतिस्तान्तव पितृदेवत्ये। एतत्प्रयोगेष्वेषामित्वाभावो निपात्यते। तारका ज्योतिः। वर्ण
का प्रावरणविशेषः। अष्टका पितृदेवत्यं कर्म॥ १३॥ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ
द्वितीयोऽध्यायः॥ २॥ ॥ धातोः पूजार्थस्वतिगतार्थाधिपर्यतिक्रमार्थातिवर्जः प्रादिरुपसर्गः प्राक् च। धातोः संबंधी तदर्थद्योती प्रादिरुपसर्गः स्यात्। स च स
तः प्राक् च न परं व्यवहितः पूजार्थस्वतिगतार्थाधिपरी अतिक्रमार्थमतिं वर्जयित्वा। प्रणयति। परिणयति। धातोरिति किं। वृक्षं वृक्षमभिसेकः। पूर
जार्थस्वत्यादिवर्जनं किं। सुसिक्तं। अतिसिक्तं भवता। अध्यागच्छति। आ गच्छत्यधि। पर्यागच्छति। आगच्छति परि। अतिसिक्तं धाताः इति किं। प्राकेति
च गतिसंज्ञा यावत्॥ ऊर्याद्यनुकरणच्विडाचश्च गतिः। एतउप सर्गाश्च धातोः संबंधिनो गतयः स्युः। तत्र प्राग्धातोः। ऊर्यादि ऊ
रीकृत्य। उरीकृत्य। अनुकरणं। खाट्कृत्य। च्वि। शुक्लीकृत्य। डाच्। पटपटाकृत्य। उपसर्ग। प्रकृत्य॥ २ कारिका स्थित्यादौ। स्थित्यादावर्थे का
रिका गतिः स्यात्। स्थितिर्मर्यादा वृत्तिर्वा। कारिकाकृत्य॥ ३ भूषादरक्षेपेऽलं सदसत्। एष्वर्थेषु ते यथासंख्यं गतयः स्युः। अलंकृत्य। सत्कृत्य। असत्कृ
त्य। भूषादिष्विति किं। अलं कृत्वा मा कार्षीरित्यर्थः॥ ४ अग्रहानुपदेशेऽन्तरदः। अनयोरर्थयोरन्तरदसी यथासंख्यं गती स्याताम्। अंतर्हत्य। अदःकृत्य [illegible]
यति॥ ५ कणेमनसी श्रद्धाप्रतीघाते। एतावव्ययौ श्रद्धाप्रतीघाते गम्यमानायां गती स्याताम्। कणेहत्य मनोहत्य पयः पिबति। श्रद्धा इति किं। तण्डुलावयवे कणे हत्वा॥ ६ पुरोऽस्तम
व्ययं। एतावव्ययौ गती स्याताम्। पुरस्कृत्य। अस्तंगत्य। अव्ययमिति किं। पुराःकृत्वा नगरीत्यर्थः॥ ७ गत्यर्थवदोऽच्छः। अच्छेत्यव्ययं गत्यर्थानां वदश्च धातोः
संबंधे गतिः स्यात्। अच्छगत्य। अच्छोद्य॥ ८ तिरोऽन्तर्धौ। तिरः अन्तर्धौ गतिः स्यात्। तिरोभूय॥ ९ कृगो नवा। तिरः अन्तर्धौ कृगः संबंधि गतिर्वा स्यात्। तिर
स्कृत्य तिरःकृत्य। पक्षे तिरः कृत्वा॥ १० मध्येपदेनिवचनेमनस्युरस्यनत्याधाने। अनत्याधानमनुपश्लेषो [illegible] वा। [illegible] रात अव्ययान्य

[illegible] न्वानिर्गता॥ ३५ तिष्ठद्ग्वित्यादयः। एते समासा अव्ययीभावः स्युः। यथायोगमन्यस्य पूर्वस्य वा पदस्यार्थे। तिष्ठद्गु [illegible]
[illegible] नित्यं प्रतिनाल्पे। अल्पार्थं नं प्रतिना नाम नित्यं समासोऽव्ययीभावः स्यात्। शाकप्रति। अल्प इति किं। वृक्षं प्रति विद्युत्॥ ३७ संख्याक्षश
लाका परिणा द्यूतेऽन्यथावृत्तौ। संख्यावाच्यक्षशलाके च द्यूतविषयायामन्यथावृत्तौ वर्त्तमानेन परिणा सह नित्यं समासोऽव्ययीभावः स्यात्। एकपरि। अक्ष
परि। शलाकापरि। एकेनाक्षेण शलाकया वा न तथा वृत्तं यथा पूर्वं जय इत्यर्थः॥ संख्यादि इति किं। पाशकेन न तथा वृत्तं। द्यूत इति किं। रथस्याक्षेणान्य
थावृत्तं॥ ३८ विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिपश्चात्क्रमख्यातियुगपत्सदृक्संपत्साकल्यान्तेऽव्ययं। एष्वर्थेषु वर्त्तमानमव्यय
नाम्नाऽन्येन पूर्वपदार्थवाच्ये नित्यं समासोऽव्ययीभावः स्यात्। विभक्ति। [illegible] अधिस्त्रि। समीपे। उपकुंभं। समृद्धि। सुमद्रं। विगताऋद्धिर्व्यृद्धि। दु
र्यवनं। अर्थाभाव। निर्मक्षिकं। अत्ययोऽतीतत्वं। अतिवर्षं। असंप्रतीति संप्रत्युपभोगाद्यभाव। अतिकंबलं। पश्चा। अनुरथं। क्रम। अनु
ज्येष्ठं। ख्याति। इतिभद्रबाहु। युगपत्। सचक्रं धेहि। सदृक्। [illegible] संपत्। सब्रह्म साधूनां। साकल्य। सतृणमभ्यवहरति। अन्तः। अग्निपिं
डेषणमधीते॥ ३९ योग्यतावीप्सार्थानतिवृत्तिसादृश्ये। एष्वर्थेषु अव्य यं नाम्ना सह पूर्वपदार्थे समासोऽव्ययीभावः स्यात्। अनुरूपं। प्रत्यर्थं।
यथाशक्ति। सशीलमनयोः॥ ४० यथाऽथा। थाप्रत्ययवर्जं यथेत्यव्ययं पूर्वप दार्थे समासोऽव्ययीभावः स्यात्। यथारूपं चेष्टते। यथावृद्धं। यथासूत्रं। अ
थेति किं। यथा चैत्रस्तथा मैत्रः॥ ४१ गतिक्वन्यस्तत्पुरुषः। गतयः कुश्च नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात्। अन्यो बहुव्रीह्यादिलक्षणहीनः। उरीकृत्य
। खाट्कृत्य। प्रकृत्य। कारिकाकृत्य। कुब्राह्मणः। कोष्णं। अन्य इति किं। कुपुरुषकः॥ ४२ दुर्निन्दाकृच्छ्रे। दुरव्ययं निन्दाकृच्छ्रे वृत्तिनाम्ना सह नित्यं
समासस्तत्पुरुषः स्यात्। दुष्पुरुषः। दुःकृतं। अन्य इति किं। दुःपुरुषकः॥ ४३ सुः पूजायां। सु इत्यव्ययं पूजार्थं नाम्ना सह नित्यं समासस्तत्पुरुषः॥
स्यात्। सुराजा। अन्य इति किं। सुमद्रः॥ ४४ अतिरतिक्रमे च। अतिक्रमे पूजायां चार्थे अतीत्यव्ययं नाम्ना सह समासस्तत्पुरुषः स्यात्। अतिस्तुत्य।
अतिराजा॥ ४५ आङल्पे। आङित्यव्ययमल्पार्थं नाम्ना समासस्तत्पुरुषः स्यात्। आकडारः॥ ४६ प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः

सहस्रेन नोनिर्त तृतीयांतनम होन्यपदार्थे समस्यते सुवबहुब्रीहिः सपुत्र आगतः। सकर्मकः॥२४ दिग्भ्यः स्त्र्यंतराले। रूढा दिग्वाचिना सहांतराले. न्य
पदार्थवाच्ये समासो बहुब्रीहिः स्यात्. दक्षिणपूर्वा कु। रूढेति किं। ऐंद्र्याश्च कौबेर्याश्च दिशो यदंतरालमिति॥२५ तत्रादाय मिथस्तेन प्रहृत्येति सरू
पेण युद्धेऽव्ययीभावः। तत्रेति सप्तम्यंतं मिथः आदायेति क्रियाव्यतिहारे तेनेति तृतीयांतं मिथः प्रहृत्येति क्रियाव्यतिहारे समानरूपाणां नाम्नां युद्धविषये
ऽन्यपदार्थे वाच्ये समासोऽव्ययीभावः स्यात्। केशाकेशि। दंडादंडि। तत्रेति तेनेति किं। केशांश्च केशांश्च गृहीत्वा सुखंसुखं प्रहृत्य कृतं युद्धं
आदायेति प्रहृत्येति किं। ...कायस्थ व२छित्वा। दंडैश्च दंडैश्चागत्य कृतं युद्धं गृहकोकिलास्यां सरूपेणेति किं। हस्तेन पादेन गृहीत्वा युद्धे कृते. युद्ध इति किं
हस्तेनादाय सख्यं कृतं॥२६ नदीभिर्नाम्नि. नामनदीवाचिना नाम्ना संज्ञायामन्य पदार्थे समासोऽव्ययीभावः स्यात्. उन्मत्तगंगं देशः। लोहितगंगं देशः। नाम्नी
ति किं. शीघ्रगंगो देशः॥२७ संख्या समाहारे. संख्यावाचिनदीवाचिभिः सह समाहारे गम्ये समासोऽव्ययीभावः स्यात्. द्वियमुनं। पंचनदं। समाहार इ
ति किं। एकनदी॥२८ वंशेऽन्यपूर्वार्थे। विद्यया जन्मना वा एकसंतानो वंशः। तत्र सा वंश्यः॥ तद्वाचिना नाम्ना संख्यावाचिसमासोऽव्ययी
भावः स्यात्। पूर्वपदार्थवाच्ये। एकमुनि व्याकरणस्य। सप्तकाशीराज्यस्य। पूर्वार्थ इति किं। द्विमुनिकं व्याक... २९ पार... मध्ये ष्ठ्यंतः षष्ठ्या वा. ए
तानि षष्ठ्यंतेन पूर्वपदार्थे समासोऽव्ययीभावो वा स्यात्। पारगंगं। मध्येगंगं। अग्रेवणं। अंतर्गिरिं। पक्षे गंगापारं। गंगा... वनाग्रे। गिर्यंतः॥३० यावदियत्त्वे
यत्त्वेऽवधारणे गम्ये यावदिति नाम नाम्ना पूर्वपदार्थवाच्ये समासोऽव्ययीभावः स्यात्। यावदमत्रं ब्राह्मणानामंत्रय इयत्त्व इति किं। याव... तावद्भुक्तं॥३१ पर्यपा
ङ्बहिरंचवः पंचम्या। एतानि पंचम्यंतेन पूर्वपदार्थवाच्ये समासोऽव्ययीभावः स्यात्। परित्रिगर्त्तं। अपत्रिगर्त्तं। आग्रामं। बहिर्ग्रामं। प्राग्ग्रामं। पंचम्येति किं। परि
वृक्षं विद्युत्॥३२ लक्षणेनाभिप्रत्याभिमुख्ये। लक्षणं चिह्नं तद्वाचिना आभिमुख्यार्थवृत्ती प्रती पूर्वपदार्थे समासोऽव्ययीभावः स्यात्। अभ्यग्नि प्रत्यग्नि
...ना: पतंति लक्षणेनेति किं। स्रुघ्नं प्रतिगतः। पूर्वपदार्थ इत्येव। आभिमुख्यं कागाव॥३३ दैर्घ्येऽनु। दैर्घ्यं आयामविषयस्य लक्षणं तद्वाचिना पूर्वपदार्थे...
...भावः स्यात्. अनुगंगं वाराणसी दैर्घ्य इति किं। वृक्षमनु विद्युत्॥३४ समीपे। समीपार्थेऽनुः समीपवाचिना पूर्वपदार्थे समा...

प्रथमाद्यंतैः॥ प्राद्यो गताद्यर्थाः प्रथमांतैः क्रांताद्यर्था द्वितीयांतैः। अवादयः क्रुष्टाद्यर्थाः तृतीयांतैः। पर्यादयो ग्लानाद्यर्थाश्चतुर्थ्यंतैः निरादय
क्रांताद्यर्थाः पंचम्यंतैर्नित्यं समासस्तत्पुरुषः स्यात्। प्राचार्यः। समर्थः। अतिखट्वः। उद्वेलः। अवकोकिलः। परिवीरुत्. पर्यध्ययनः। उत्क्रामः। निष्कौशां
बिः। अपशाखः। बाकुल्लकानुषष्ठ्यापि अंतर्गार्ग्यः। गताद्यर्था इति किं। वृक्षं परि विद्युत्। अन्य इत्येव प्रत्यर्थकोदेशः॥४७ अव्ययं प्रवृद्धादिभिः। अव्य
यं प्रवृद्धादिभिः सह नित्यं समासस्तत्पुरुषः स्यात्। पुनःप्रवृद्धं अंतर्भूतः॥४८ ङस्युक्तं कृता। कृत्प्रत्ययविधायके सूत्रे ङस्यंतेन नाम्नोक्तं कृदंतेन तेन ना
म्ना नित्यं समासस्तत्पुरुषः स्यात्. कुंभकारः। ङस्युक्तमिति किं। अलंकृत्वा। कृतेति किं धर्मो रक्षतु॥४९ तृतीयोक्तं वा। दात्रलूनाय ... यत्पनोय
तृतीयोक्तं नाम नकृदंतेन वा समासस्तत्पुरुषः स्यात्। मूलकोपदंशं भुं... मूलकेनोपदंशं भुंक्ते॥५० नञ्। नञ् नाम्ना नाम्ना समासस्तत्पुरुषः स्यात्। अब्राह्मणः
अस्पूर्यंपश्या राजदाराः॥५१ पूर्वापराधरोत्तरमभिन्नेनांशिना। पूर्वा... दयो ऽंशवाचिनोंऽशवता विना समासस्तत्पुरुषः स्यात्। न वक्ष्यो ऽंशी भिन्नः
पूर्वकायः। अपरकायः। उत्तरकायः। अधरकायः। अभिन्नेनेति किं। पूर्वं छात्राणामामंत्रयस्व। अंशिनेति किं। पूर्वं नाभेः कायस्य पर
...मायाह्नादयः। एतत्रेशीनतत्पुरुषाः साध्वः स्युः। सायाह्नः। मध्यंदिनं॥५२ सममंऽशार्द्धं नवा। समांशवाची अर्द्धं शब्दोऽभिन्नेनांशिना समासस्तत्पुरुषः
स्यात्। अर्द्धं पिप्पल्याः पिप्पल्यर्द्धं। समेत्याति किं। ग्रामार्द्धः॥५४ जरत्यादिभि... वा। तिरं। त्रीतिरं तिस्रो वा समासस्तत्पुरुषः स्यात्। अर्द्धं जरत्याः जरत्यर्द्धः
। अर्द्धोक्तं उक्तार्द्धं॥५५ द्वित्रिचतुष्पूरणाग्रादयः। पूरणप्रत्ययांता द्वित्रिचतुःशब्दाः अग्रादयश्चाभिन्नेनांशिना वा समासस्तत्पुरुषः स्यात्। द्वितीयं भिक्षायाः। भि
क्षाद्वितीयं। तृतीयं भिक्षा। भिक्षातृतीयं। तुर्यं भिक्षा। भिक्षातुर्यं। अग्रं हस्तस्य। हस्ताग्रं। तलं पादः। पादतलं॥५६ कालो द्विगौ च मेयैः। कालवाच्येकवचनांतं द्वि
गौ च विषये मयवाचिना समासस्तत्पुरुषः स्यात्। मासजातः। द्विगौ। एकमासजातः। द्व्यह्नजातः। काल इति किं। द्रोणो धान्यस्य॥५७ स्वयंसामी क्तेन। ए
तत् अव्ययं क्तांतेन समासस्तत्पुरुषः स्यात्। स्वयंधौतः। सामिकृतं। क्तेनेति किं। स्वयं कृत्वा॥५८ द्वितीया खट्वा क्षेपे। खट्वेति द्वितीयांतं क्षेपनिंदायां क्तां
तेन वा समासस्तत्पुरुषः स्यात्। खट्वारूढो जाल्मः। क्षेप इति किं। खट्वामारूढः पिता अध्यापयति॥५९ कालाः... त्रिवितीयांतं क्तांत

...कोऽनेन समासः ... त
नसमासस्तत्पुरुषः स्यात्। ... ॥ ... तिसृता॥ ६७ व्याप्तौ। गुणक्रिया द्रव्येरत्यंत संयोगे या द्वितीया तदंतं कालवाचि ... द्वितीयांतं श्रितादिभिः समासस्तत्पुरुषः स्यात्।
पुरुषः स्यात्। मुहूर्त्तं सुखं। क्रोशं पादः। दिनं गुडः। व्याप्ताविति किं। मासं पूरकोयाति॥ ६८ श्रितादिभिः॥ द्वितीयांतं श्रितादिभिः समासस्तत्पुरुषः स्यात्।
धर्मश्रितः। त्रिवगतः॥ ६९ प्राप्तापन्नौ तयाद्यः। प्राप्तापन्नौ द्वितीयांतेन समासस्तत्पुरुषः स्यात्। तद्योगे वा ... प्राप्तजीविका। आपन्न
जीविका॥ ६३ ईषद्गुणवचनैः। ईषदव्ययं गुणवचनैः समासस्तत्पुरुषः स्यात्। ... गुणे निवर्त्तंते तद्गुणवचना॥ ईषत्पिं
गलः। ईषत् [illegible] रक्तः। गुणवचनेनेति किं। ईषत्कार्यं॥ ६४ तृतीयांतकृतैः॥ तृतीयांतं तदर्थकृतैर्गुण वचनैरेकार्थैः समासस्तत्पुरुषः स्यात्। शंकु
लाखंडः। मदपटुः। तत्कृतेरिति किं। अक्ष्णाकाणः। गुणवचनेरित्येव। दध्ना पटुः। पाटवमित्यर्थः॥ ६५ ... अर्द्ध ... तंकृतार्थे नवतस्त
... ईनवचा। राज्ञेणा॥ ६६ ऊनार्थपूर्वाद्यैः ... तंऊनार्थैः पूर्वाद्यै
राद्यैनसमासस्तत्पुरुषः स्यात्। अर्द्धैवतमोमात्रा। वतमेतिकिं। अ ... सावरः॥ ६७ [illegible]
समासस्तत्पुरुषः स्यात्। माषोनं माषविकलं। मासपूर्वः मा ... कारकं कृता। कारकवाचितृतीयांतं कृदंतेन समासस्तत्पुरुषः स्यात्।
[illegible]
आत्मकृतं। नखनिर्भिन्नः। काकापेयानदी। वाष्पाच्छन्नानि ... रकमिति किं विद्यया ... ॥ ६९ नविंशत्यादिनैकोवांतः एकशब्दसृती
यांतानविंशत्यादिनास्तत्पुरुषः स्यात्। एकस्याद्यदंतः। एकोनविंशतिः। एकान्नविंशतिः। एकान्नत्रिंशत्। एकादूनविंशतिः॥ ७० चतुर्थी
यांतां ... प्रकृत्या। प्रकृतिः परिणामिकारणं एतद्भाविनिका ... विकारार्थे समासस्तत्पुरुषः स्यात्। यूपदारु। प्रकृत्येति किं। रंधनाय स्थाली॥ ७१ हिता
दिभिः। चतुर्थ्यंतं हितादिभिः समासस्तत्पुरुषः स्यात्। गोहितं। गोसुखं॥ ७२ तदर्थार्थेन। चतुर्थ्यर्थो यस्य तेनार्थेन चतुर्थ्यंतेसमासस्तत्पुरुषः स्यात्
पित्रर्थपयः। भ्रातरार्थं यवागूः। तद ... र्थेतिकिं। पित्रर्थं॥ ७३ पंचमी भयाद्यैः। पंचम्यंतं भयाद्यैरेकार्थे समासस्तत्पुरुषः स्यात्। वृकभयं वृकात्
७३ क्तेनाल्पशः असत्वे। पंचमी तदंतं क्तेन समासस्तत्पुरुषः स्यात्। स्तोकान्मुक्तः। अल्पान्मुक्तः। असत्व इति किं। स्तोकाद्बद्धः॥ ७४ परः
[illegible]

[illegible]
दिः अपंचमीतत्पुरुषः स्यात्। साधुः परशानः परःसहस्राः॥ ७५ षष्ठ्ययत्नात्। षष्ठी या षष्ठीतदंतं नाम्नैकार्थे समासस्तत्पुरुषः स्यात्। नवेत्यत्र
नाय इत्यादिर्यत्नतः। राजपुरुषः। अयत्नादिति किं। सर्पिषो नाथितं। ... किं। गवां कृष्णा संपन्नक्षीरा॥ ७६ कृति। कर्मणि कृत। ... तिमाक्तेनि मि
त्ता षष्ठीनदंतेनास्त्रैः समासस्तत्पुरुषः स्यात्। सुप्रिर्ज्जने। गणधरोक्तिः॥ ७७ याजकादिभिः षष्ठ्यंतं याजकाद्यैः समासस्तत्पुरुषः स्यात्। ब्राह्मणयाजकः।
गुरुपूजकः॥ ७८ प ... गणकेन। ... गणकेन समासस्तत्पुरुषः स्यात्। पत्निगणकः। बहुगणकः। पत्निरिवा वितिकिं। धनस्य गणकः॥ ७९ स्त
र्वपश्चादादय। एते षष्ठीतत्पुरुषा। साधवस्फः। सर्वपश्चात्। सर्वचिरं॥ ८० अकेनक्रीडाजीवे। षष्ठ्यंतमकप्रत्ययांतेन क्रीडाजीविकयोर्गम्यमा
समासस्तत्पुरुषः स्यात्। उद्दालपुष्पभंजिका। नखलेखकः। क्रीडाजीव इ ... तिकिं। पयसः पायकः॥ न कर्त्तरि। कर्त्तरि या षष्ठी तदंतमकांतेन समा
सो न स्यात्। तवशायिका। कर्त्तरीति किं। इक्षुभक्षिका॥ ८२ कर्मजा तृचा ... वा। कर्मणि या षष्ठी तदंतं कर्तृविहिताकांतेन न समासो न स्यात्।
... अपां स्रष्टा कर्म्मजेति किं। गुणो गुणिविशेष ... कः। संबंधे च षष्ठी कर्त्तरि तृच्। पयःपायिका॥ ८३ तृतीयायो
कर्त्तरि तृतीयायां सत्यां कर्मजा षष्ठी समासो न स्यात्। आश्चर्यो ... गवां दोहो गोपालेन। तृतीयायामिति किं। ... अस्मनं शुश्रा
॥ ८४ न सार्थपूरणाव्ययातृशशशानशः। ... पूरण प्रत्ययांतेर ... व्ययेरतृशतः ... तिरामसंतिश्च षष्ठ्यं ... न समासः स्यात्। फलानां तृप्तः
घस्ततां षोडशः॥ रामस्य कृत्वा। रामस्य द्विषन्। विप्रस्य पचन्। मित्रस्य पचमानः॥ ८५ ज्ञानेच्छार्चार्थाधारक्तेन। ... ज्ञानेच्छार्चार्थाधारस्यो
... वर्तमाने क्तो यस्तु ... आधारक्तस्तदंतेन षष्ठ्यंतं न समस्यते। राज्ञां ज्ञातः। राज्ञां मतः। राज्ञां पूजितः॥ ८६ अस्वस्थे
गुणे। ... गुणाः स्वात्मन्येव तिष्ठंति न द्रव्ये ... गुणवाचि ... षष्ठ्यंतं न समासः स्यात्। पटस्य शुक्लः। गुडस्य मधुरः। अस्वस्थ
गुणेरितिकिं। घटवर्णः। चंदनगंधः॥ ८७ सप्तमी शौंडाद्यैः। एतैः स ... द्यैकार्थे सप्तम्यंतं समासस्तत्पुरुषः स्यात्।
... पानशौंडः। अक्षधूर्त्तः॥ ८८ सिद्धाद्यैः पूजायां ए ... सप्तम्यंतं समासस्तत्पुरुषः स्यात्॥ ८९ ... काकाद्यैः ... सप्तम्यंतं निंदायां गम्यमाना
[illegible]
[illegible]
[illegible]

यौ समासस्तत्पुरुषः स्यात्। तीर्थकाकः। तीर्थध्वांक्ष इति किं। तीर्थे काकोस्ति॥ ७० पात्रेसमितत्या[...] पात्रे
समिताः। गेहेशूरः॥ ७१ क्तेन सप्तम्यंतं क्तांतेन [...] समासस्तत्पुरुषः स्यात्। सप्त निकृतं। अवतप्तेनकुलस्थितं॥ ७२ तत्राहोरात्रांशाः। तत्रेति स
प्तम्यंतं अहरवयवा रात्र्यवयवाश्च सप्तम्यंताः क्तांतेन समासस्तत्पुरुषः स्यात्। तत्रकृतं। पूर्वाह्णकृतं। पूर्वरात्र[...]। तत्राहोरात्रांशा इति किं। घ
टे कृतं। अहोरात्रग्रहणं किं। शुक्लपक्षे कृतं। अंशा इति किं। अह्नि भुक्तं। रात्रौ वृत्तं॥ ७३ सप्तम्यंतं [...] संज्ञाविषये समासस्तत्पुरुषः स्यात्। अरण्ये
तिलकाः। अरण्येमाषकाः॥ ७४ कृत्यैर्नावश्यके। सप्तम्यंतेनामयेद्यात कृत्यैः तेनावश्यं तावेगम्ये समासस्तत्पुरुषः स्यात्। मासदेयं। ऋदिति
किं। मासस्य पित्र्यं॥ ७५ विशेषणं विशेष्येणैकार्थं कर्मधारयश्च। भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे [...] कार्थ्येन विशेषणं वा विशे
ष्यं वा विनैकार्थं समासस्तत्पुरुषः स्यात्। कर्मधारयश्च। नीलोत्पलं। खंजकूटः। कूटखंजः। एकार्थ इति किं। वृद्धस्योक्षा वृद्धोक्षा॥
७६ पूर्वकालैकसर्वजरत्पुराणनवकेवलं। पूर्वः कालो यस्य त[...] दाद्येकादीनि विकार्थानि परेणानाम्ना समासस्तत्पुरुषः कर्म
धारयश्च स्यात्। स्नातानुलिप्तः। एकशाटी। सर्वान्नं। जरद्गवः। पुराण[...]कविः। नवान्नं। केवलज्ञानी। एकार्थ इत्येव। स्नात्वानुलिप्तः॥
७७ दिगधिकं संज्ञातद्धितोत्तरपदे। दिग्वाच्यधिकं चैकार्थे नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात्। संज्ञायां। तद्धिते च विषयभूते उत्तरप
दे च परतः। दक्षिणकोशला। पूर्वेषुकामशमी। दाक्षिणशालः। आधि[...]षाष्टिकः। उत्तरगवधनः। अधिकगवप्रियः॥ ७८ संख्या समाहारे च द्विगुश्चा
नाम्न्ययं। संख्यावाचि परेण नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात्। तद्धितयोर्विषये उत्तरपदे च परतः समाहारे चार्थेऽयमसंज्ञायां
द्विगुश्च। पंचाम्राः। सप्तर्षयः। द्वैमातुरः। अध्यर्द्धकंसः। पंचगवधनः। पंचराजी। समाहार इति किं। अहो प्रवचनमातरः। अनाम्नीति किं। पांचर्षी। [...]
निंद्यं कुत्सनैरपापाद्यैः। निंद्यवाचि निंदाहेतुभिः पापादिवर्जैः सह समासस्तत्पुरुषः कर्मधारयश्च स्यात्। वैयाकरणखसूची। मीमांसकदुर्दुरूढः। नि
द्यमिति किं। वैयाकरणश्चौरः। अपापाद्यैरिति किं। पापवैयाकरणः। हतविधिः॥ ८० उपमानं सामान्यैः। उपमानवाच्येकार्थं उपमानोपमेयसाधारण

र्मवाचिभिः सह समासस्तत्पुरुषः कर्मधारयश्च स्यात्। शस्त्रीश्यामा। मृगचपला। उपमानमिति किं। देवदत्तश्यामा। सामान्यैरिति किं। अग्निर्माणवकः॥ ८१
उपमेयं व्याघ्राद्यैः साम्यानुक्तौ। उपमेयवाच्येकार्थं उपमानवाचिभिर्व्याघ्राद्यैः साधारणधर्मानुक्तौ समासस्तत्पुरुषः कर्मधारयश्च स्यात्। पुरुषव्या
घ्रः। असिंहः। साम्यानुक्ताविति किं। पुरुषव्याघ्रः शूर इति मा भूत्॥ ८२ पूर्वापरप्रथमचरमजघन्यसमानमध्यमवीरं। एतान्येकार्थानि नाम्ना [...]
मासस्तत्पुरुषः कर्मधारयश्च स्यात्। पूर्वपुरुषः। अपरपुरुषः। प्रथमपुरुषः। चरमपुरुषः। जघन्यपुरुषः। समानपुरुषः। मध्यपुरुषः। मध्यमपुरु
षः॥ ८४ श्रेण्यादि कृताद्यैश्च्व्यर्थे। श्रेण्याद्येकार्थं कृताद्यैः सह च्व्यर्थे गम्ये समासस्तत्पुरुषः कर्मधारयश्च स्यात्। श्रेणीकृताः। ऊकंकृताः। च्व्यर्थ इति किं।
श्रेणयः कृताः केचिन्न॥ ८५ क्तं नञादिभिन्नैः। क्तांतं नामैकार्थं नञ्प्रकारेरेव यानि भिन्नानि तैः सह समासस्तत्पुरुषः कर्मधारयश्च स्यात्। कृताकृतं
पीतापीतं। क्तमिति किं। कर्तव्यमकर्तव्यं। नञादिभिन्नैरिति किं। कृतप्रकृतं [...] कृतं यो विहितं। सेडनिटा सह [...] नानिटा सह [...]
स्यते। क्लिशितमक्लिष्टं। खातमखातं। सेटिति किं। कृताकृतं। अनिटेति किं। अशितानशितं॥ ८६ सन्महत्परमोत्तमोत्कृष्टं पूजायां। एतान्ये
कार्थानि पूजायां गम्यमानायां पूज्यवाचिना सह समासस्तत्पुरुषः कर्मधारयश्च स्यात्। सत्पुरुषः। महापुरुषः। [परम]पुरुषः। उत्तमपुरुषः
उत्कृष्टपुरुषः। पूजायामिति किं। सन् घटः। [...]॥ ८७ वृंदारकनागकुंजरैः। पूजायां गम्यमानायामेकार्थं पूज्यवाचि [...] सह समासस्तत्पुरुषः कर्म
धारयश्च स्यात्। गोवृंदारकः। गोनागः। गोकुंजरः। पूजायामित्येव। सुसीमो नागः॥ ८८ कतरकतमौ जातिप्रश्ने। एतावेकार्थौ [...] येन
नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात्। कतरकठः। कतमगार्ग्यः। जातिप्रश्न इति किं। कतरः शुक्लः। कतमो गोना॥ ८९ किं क्षेपे। किंशब्दः क्षेपे ग
म्यमानायां किमत्येकार्थं स्ववाचिना समासस्तत्पुरुषः कर्मधारयश्च स्यात्। किंराजा। किंगौः। क्षेप इति किं। को राजा [...]॥ ९० पोटायुवतिस्तोक
कतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तप्रशंसारूढैर्जातिः। पोटादिभिः [...] जात्यन्यकार्थं सम
समासस्तत्पुरुषः कर्मधारयश्च स्यात्। इभ्यापोटा। नागयुवतिः। अग्निस्तोकं। दधिकतिपयं। गोगृष्टिः। गोधेनुः। गोवशा। गोवेहत्। [...] कठप्रव

क्ता कठश्रोत्रिय कराध्मपकः मृगधूर्त्तः॥गोम तल्लिका. गोघकांडं॥१२वडष्याइलिप्सा यज्ञारःपादा [illegible] लिप्सा समासस्त
त्पुरुषः कर्मधारयश्चस्यात्. गोगर्ल्लिणी महिषगर्ल्लिणी॥ जातिरित्येव। कालाक्षीगर्ल्लिणी॥१३युवाखलति [illegible] जरह [illegible] [illegible] का वीमत्तिश्च
त्ससमासस्तत्पुरुषः कर्मधारयश्चस्यात्. युवखलतिः युवपलितः युवजरन्. युववलिना॥१४कृत्यतुल्याख्यमजात्या। [illegible] तुल्यपर्याये वेकार्थ
मजात्येनसह समासस्तत्पुरुषः कर्मधारयश्चस्यात्।।लात्यां [illegible] तुल्यपड कृत्यसम्. सद्दशमहान्। अजात्येतिकिं। [illegible] [illegible] श्रमणा
दिना।कुमा रैत्येकार्थे श्रमणादिना समासस्तत्पुरुषः कर्मधारयश्चस्यात्. कुमारश्रमणा. कुमारप्रव्रजिता॥१६मयूर व्यंसकेत्यादय [illegible] पुरु
ष समासा निपात्यंते। मयूरव्यंसकः॥ कंबोजमुंडः। एहीडंकर्म्म। अश्नी तपिबता क्रियाकुरुक टावक्ता। गतप्रत्यागते। क्रयाक्रयिका [illegible] आपा
र्थिवः त्रिसागः सर्वश्वेतः॥१७चार्थेद्वंद्वः सहोक्तौनामनाम्ना सहो क्तिविषयचार्थवृत्ति समासो द्वंद्वः स्यात्। [illegible] न्ययोश्चे वाक्यमेवं ना
मनाम्न त्यतुवृत्ता वपिलघुह्रस्वदिसूत्रे एकग्रहणा त्वबहूना मपि धवखदिरपलाशाः। चार्थ इति किं बाष्पासहो क्तोमा भूत्।
ग्रामो ग्रामो रमणीयः। सहोक्ता विति किं प्लक्षश्च न्यग्रोधश्च वीक्ष्यतां॥१८समानामर्थेनैकः॥ शेषः॥ अर्थेनसमानानांमध्ये नोक्तोगम्या
यामेकः शिष्यते। अर्थादन्येनिवर्त्तंते. वक्रश्चकुटिलश्चवक्रौकुटिलौ वासितश्च शुक्लश्च धवलश्च सिताः शुक्लाः श्वेता वा अर्थेनसमानामिति
किं। प्लक्षन्यग्रोधौ। सहोक्ता वित्येव। वक्रश्चकुटिलश्च दृश्यः॥१९स्यादाव संख्येयः॥ सर्वेभिन्नरूपा सविसक्तो समानां तुल्यरूपाणां सहोक्तावेकः
शिष्यते। नतु संख्येयवाची। अक्षश्च। शाकटस्य अक्षश्च देवनः अक्षश्च बिलीतकः। अक्षाः स्यादा विति किं। माता चजननी। माता च धन्यस्य मात्र
मातरौ। असंख्येइति किं। एकश्चैकश्च॥२०त्यदादि॥ त्यदादीरन्येनच सहोक्तौ त्यदादिरावेकः शिष्यतेसच विवक्षातो। सचयश्चयौ अहंचत्वंचवयं
॥२१भ्रातृपुत्राः स्वसृदुहितृभिः॥ स्वसर्थेनसहोक्तौ भ्रातृ र्थो दुहित्रर्थेनच पुत्रार्थएकः शिष्यते। भ्राताच स्वसाच भ्रातरौ पुत्रश्च दुहिता च पुत्रौ॥२२पिता मात्रा वा।
मात्रर्थेन सहोक्तौ पिता वा एकः शिष्यते। पिता च माता च। पितरौ मातापितरौ॥२३श्वशुरः श्वश्र्वा वा॥ श्वश्रू अर्थेन सहोक्तौ श्वशुरः एको वा शिष्यते श्व २९

सुरौ। श्वश्रूश्वशुरौ॥२४वृद्धो यूनातन्मात्रभेदे. यूना सहोक्तौ वृद्धो वा एकः शिष्यते। तन्मात्रभेदेन चेत्प्रकृति. भेदः। वृद्धो वा ऽन्यः स्यात्। गार्ग्यश्च गा
र्ग्यायणश्च। गार्ग्यौ। वृद्ध इति किं। गर्गगार्ग्यायणौ। यूनेति किं। गार्ग्यगार्ग्यौ तन्मात्र इति किं। गार्ग्यवात्स्यायनौ॥२५स्त्रीपुंवच्च वृद्ध स्त्रीवा यूना स
होक्तौ एकः शिष्यते पुल्लिंगश्चायं तन्मात्रभेदे. गार्गीच गार्ग्यायणश्च गार्ग्यौ गार्गी च गार्ग्यायणौ च. गर्गाः॥२६पुरुषः स्त्रिया॥ पुरुषश्चाद्यः। [illegible]
नितु सिरूढः स्त्रीवाचिना सहोक्तौ पुरुषएकः शिष्यते। स्त्रीपुरुषमात्रात्तदश्चेत्। ब्राह्मणश्चब्राह्मणी च ब्राह्मणौ पुरुषइति किं। तीरंनदनदीपाला: त
न्मात्रात्तदइति किं पुंस्त्रियो॥२७ग्राम्याशिशु द्विशफसंघस्त्री प्राय॥ ग्राम्या अशिशवो ये द्विशफा द्विखुराः अर्थास्तेषांसंघे स्त्रीपुरुषसहोक्तौ प्रा
यः स्त्रीवाएकः शिष्यते स्त्रीपुरुषमात्रात्तदश्चेत्। गावश्च स्त्रियो गावश्चनराः इमागावः ग्राम्येतिकिं। रुरवश्च इमेरुरवः॥ इमेरुरवः
अशिश्विति किं वर्करीश्च वर्कराश्चवर्कराः द्विशफ इति किं। गर्दभाश्च ग ईभाः संघइति किं। गोश्चायं गौश्चेयं। इमोगावौ। प्रायइति किं। उष्ट्रा
श्चउ ष्ट्र्यश्चउष्ट्राः॥२८क्लीबमन्येनैकंचवा क्लीबं नपुंसकमन्ये ना क्लीबेन सहोक्तौ क्लीबं शिष्यते। क्लीबाक्लीबमात्रात्तदश्चेत् विशि
ष्यमाणं एकामकार्थं चवास्यात्। शुक्लंच शुक्लश्च शुक्लं शुक्ले वा शु क्लंच शुक्लाच शुक्लश्च शुक्लं शुक्लानि। अन्येनेतिकिं शुक्लंच श
शुक्लं तन्मात्रात्तदइत्येव हिम हिमान्यौ॥२९पुष्यार्था द्विपुनर्वसुः॥ [illegible] ष्यार्थान्नक्षत्रद्वंद्वेपरात्नक्षत्रद्वंद्वेः पुनर्वसुः एवो क्तो द्वयर्थ [illegible] कार्थः
स्यात्. उदितौ पुष्य पुनर्वसू तिष्य पुनर्वसू पुष्यार्थादिति किं आर्द्रापुनर्वसवः पुनर्वसु रिति किं। पुष्यमघा॥ सइतिकिं। तिष्यपुनर्वसवो वा [illegible]
रा॥ नामद्रव्याणांनचार्हेद्वंद्वः स्वेः॥ द्रव्येगुणाद्याश्रयो विता शिवा विनामंतदाश्रय सत्तानांद्वंद्वो वैकार्थः स्यात्॥ स्वेः स्वजातौ [illegible] [illegible] सुखं दुःखं सु
खदुःखे लाभालाभं। लाभा लाभौ विद्या विना मिति किं। कामक्रोधौ। अद्रव्याणा मिति किं। श्री तात्येजले। स्वे इति किं। जुहिमुख [illegible] ॥३१अश्ववडवपू
र्वापराधरोत्तराः॥ एतत्त्रयः पिद्वंद्वा एकार्था वास्युः॥ अश्वश्च अश्ववडवं। अश्ववडवो। पूर्वापरं। अधरोत्त [illegible] व्यंजन [illegible] दधिगोयंजनानां। रात्रे
द्वंद्व एकार्थो वा स्यात्। गामहिषं गाम हिषा। दधि घृतं दधि घृते॥३२असरूपाणां पशुमृगपक्षिणो बहुत्वे एतत्समविनां बहुधर्मो [illegible] द्वंद्व एकार्थो

पूर्वापरे‌धरो
२२-३२

वास्यात्। हृत्कन्यायोर्धः। हृत्कन्यायोधः। कुशकाशं। कुशकाशाः। तिलमाषं तिलमाषाः। क्रामे णः। हंसचक्र ... तु ... नो स
नागानां कुंडजंबूनां च बहुवर्णानां स्त्रीद्वंद्व एकार्थो नित्यं स्यात्। अश्वरथं। यूकालिक्षं। ३५ फलस्य जातौ। फ ... नां बहुवर्णानां ... द्वंद्व एकार्थः
स्यात्। बदरामलकं। जातावितिकिं। एता नि बदरामलकानि संति॥ ३६ अप्राणि पश्वादेः प्राणिस्यः पश्वादि ... सेषां जातप्र
र्णानां द्वंद्व एकार्थः स्यात्। आराशस्त्रि ... विंध्ये। प्राण्यादिवर्जने किं। ब्राह्मणक्षत्रियविट्शूद्राः ... ग्राममहि
षो। गोमहिषं हृत्कन्यायोर्धे ... अश्वरथौ बदरामलके। बदरामलकं। ३७ प्राणितूर्यांगाणां। प्राणितूर्य ...
र्णानासिकं मार्दंगिकपाणविकं। खदिरत्पव पाणिगृध्रे। ३८ चरणस्य स्थे णोः द्यतन्यामनुवादे चरणा ... णो
नयोः कर्तृवचनसंबंधिनां द्वंद्वो नुवादविषये एकार्थः स्यात्। प्रत्य ... शन्नकठकालापं उदगात्कठकौथु ... अनुवाद इति किं। उदगुः क
ठकालापाः। अग्रसिद्धं कथयति॥ ३९ अक्लीबे ध्वर्युक्रतोः॥ ... अध्वर्युर्यज्ञुर्वेदः तद्विहितक्रतूनां द्वंद्व एकार्थः स्यात्। न
वेदे ते क्लीबत्वरयः। अर्काश्वमेधं। अक्लीब इति किं। गवामयनादि ... त्यानामयने। अध्वर्युरिति किं। दर्शपौर्णमासौ॥ ४० निकटपाठस्य। निकटः
पाठो येषामध्येतॄणां तेषां द्वंद्व एकार्थः स्यात्। पदकक्रमकं॥ ४१ नित्य वैरस्य नित्यं जातिनिबद्धं वैरं येषां तेषां द्वंद्व एकार्थः स्यात्। अहिनकुलं।
नित्यवैरस्येति किं। देवासुराः॥ ४२ नदीदेशपुरां विलिंगानां। एषां विविधलिंगानां द्वंद्व एकार्थः स्यात्। गंगाशोणं। कुरुकुरुक्षेत्रं। मथुरापाटलिपु
त्रं। विलिंगानामिति किं। गंगायमुने॥ ४३ पात्र्यशूद्रस्य। पात्रार्हशूद्राणां द्वंद्व एकार्थः स्यात्। तक्षायस्कारं। पात्र्य इति किं। जनंगमबुक्कसाः॥ ४४
गवाश्वादिः। अयं द्वंद्व एकार्थः स्यात्। गवाश्वं। गवाविकं॥ ४५ न दधिपयआदिः। दधिपय आद्यो द्वंद्व एकार्थो न स्यात्। दधिपयसी। सर्पिर्मधुनी॥ ४६ सं
ख्याने वृत्तिपशुपक्षिवर्णानां गणनेऽन्यद्वंद्व एकार्थो न स्यात्। दश गोमहिषाः। बदरा पाणिपादाः॥ ४७ वान्तिक। वृत्तिपदार्थानां संख्यानस्य समीपगम्ये द्वंद्व एका
र्थो वा स्यात्। उपदशं गोमहिषं। उपदशा गोमहिषाः॥ ४८ प्रथमोक्तं प्राक्। अत्र समासप्रकरणे प्रथमांतनयनिर्दिष्टं तत्प्राक्स्यात्। आसन्नदशाः।

२७

शाः। सप्तगवं॥ ४९ राजदंतादिषु। एषु समासेष्वप्राप्तप्राग्निपातं प्राक्स्यात्। राजदंतः। लिप्तवासितं॥ ५० विशेषणसर्वादिसंख्यं बहुव्रीहौ। विशेषणं
सर्वादिसंख्या वा बहुव्रीहौ प्राक्स्यात्। चित्रगुः। सर्वशुक्लः। द्विकृष्णः॥ ५१ क्तः। क्तांतमर्थं बहुव्रीहौ प्राक्स्यात्। कृतकटः॥ ५२ जातिकालसुखादेर्नवा
जातः कालात् सुखादिस्यश्च बहुव्रीहौ क्तांतं वा प्राक्स्यात्। शांर्गजग्धी। जग्धशांर्गी। मासजाता। जातमासा। सुखजाता। जातसुखा। दुःखजाता। जात
दुःखा॥ ५३ आहिताग्न्यादिषु। एषु बहुव्रीहिषु क्तांतं वा प्राक्स्यात्। आहिताग्निः। अग्न्याहितः। जातदंतः। दंतजातः॥ ५४ प्रहरणात्। प्रहरणार्था
त् क्तांतं बहुव्रीहौ वा प्राक्स्यात्। उद्यतासिः। असिरुद्यतः॥ ५५ न सप्तमी इंद्वादिस्यश्च। इंद्वादेः प्रहरणार्थाच्च प्राक् सप्तम्यंतं बहुव्रीहौ न स्यात्। इंदुमौ
लिः। पद्मनाभः। असिपाणिः॥ ५६ गड्वादिस्यः। गड्वादिस्यो बहुव्रीहौ सप्तम्यंतं प्राग्वा स्यात्। कंठेगडुः। गडुकंठः। मध्येगुरुः। गुरुमध्यः॥ ५७ प्रियः। अयं ब
हुव्रीहौ प्राग्वा स्यात्। प्रियगुडः। गुडप्रियः॥ ५८ कडारादयः कर्मधा रये। एतत्कर्मधारये प्राग्वा स्युः। कडारजैमिनिः। जैमिनिकडारः। का
णद्रोणः। द्रोणकाणः॥ ५९ धर्मार्थादिषु द्वंद्वे। एषु द्वंद्वेषु प्राक्प्रा ... क्तं प्राग्वा स्यात्। अर्थधर्मौ। शब्दार्थौ। अर्थशब्दौ॥ ६० लघ्वक्षरा
सखीदुत्स्वरादेकदल्पस्वरार्च्यमेकं। लघ्वक्षरं सखिवर्जमिदुदंतं स्वरा ... द्यकारांतमल्पस्वरं पूज्यं वा नि ... द्वंद्वे प्राक्स्यात्। शरद्ग्रीष्मौ। अ
ग्नीषोमौ। वायुतोयौ। असखीति किं। सुतसखायौ। अश्वरथौ। ... र्जुन योधौ। श्रद्धामेधे। ... क
ट। एकमितिकिं। शंखदुंदुभिवीणाः॥ इंद्व इत्यत्र विस्पष्टपटुः॥ ६१ मासवर्णभ्रात्रनुपूर्वं। एतद्विद्वंद्वे नुपूर्वं प्राक्स्या ... ब्राह्म
णक्षत्रियौ। ब्राह्मणक्षत्रियविट्शूद्राः। बलदेववासुदेवौ॥ ६२ भर्तुतुल्यस्वरं। नक्षत्रऋतुवाचि तुल्यस्वरं द्वंद्वेऽनुपूर्वं प्राक्स्यात्। ... णी। भरणी। कृ
त्तिकाः। हेमंतशिशिरवसंताः। तुल्यस्वर इति किं। आर्द्रामृगशिरसी। ग्रीष्मवसंतौ॥ ६३ संख्यासमासे समासे ... संख्या ... प्राक्स्यात्। द्वा
त्रिंशती। एकादश॥ ६४॥ ॥ तृतीयस्याध्यायस्य प्रथमः पादः॥ ॥ परस्परान्योन्येतरस्यामुस्यादर्वा पुंसि ... त्रीनां स्यात्। ... स्यो
लवा। परस्परं परस्परं। अन्योन्यं। इतरेतरं। इतरेतरं। त्राजयत। आतिः सखी ति; कुलेबी। परस्परं प ... अन्योन्यो। अन्यो ... इतरेतरं स्तर

तारण। लोज्यते। अपुंसीति किं। नरा। परस्परं लाजयंति॥ अमव्ययीभावस्यातो पंचम्याः अदंत[illegible]व्ययीभावस्य स्यादेरम् स्यात्। उपकुंभाद
पकुंभमस्ति उपकुंभं देहि। अव्ययीभावस्येति किं। प्रियोपकुंभाय। अन इति किं। अधिस्त्रि। अपंचम्या इति किं। उपकुंभात्। [illegible]। अदं
तस्याव्ययीभावस्य तृतीयायां अम् वा स्यात्। किं न उपकुंभेन उपकुंभं तेन। अव्ययीभावस्येति किं। प्रियोपकुंभेन॥ [illegible] व्ययीभाव
स्य सप्तम्याश्च वा स्यात्। उपकुंभं उपकुंभे देहि। अव्ययीभावस्येति किं। प्रियोपकुंभे॥४ ऋद्ध्यादीनां च [illegible]
[illegible] स्यात्। सुमगधं उन्मत्तगंगं। एकविंशतिभारद्वाजं वसति॥५ अनतो लुप्। अदंतवर्जस्याव्ययीभावस्य स्यादेर्लुप् स्यात् [illegible]
न इति किं। उपकुंभात्। अव्ययीभावस्येत्येव। प्रियोपवधूः॥६ अव्ययस्य। अव्ययस्य स्यादेर्लुप् स्यात्। स्वः प्रातः [illegible]
ऐकार्थ्ये। ऐकार्थ्यमेकपदत्वं तन्निमित्तस्य स्यादेर्लुप् स्यात्। चित्रगुः पुत्रीयति। अपगवः। अत एव लुप् [illegible] नाम नाम्निलुक्
तपि स्या[illegible]तानां समासः स्यात्। ऐकार्थ्य इति किं। चित्रा गावो य[illegible]स्य स्यादिवाक्यमात्रं॥ [illegible]स्वरात् खित्युत्तरपदेऽमः॥
समासाद्[illegible]कमत्यं पदमुत्तरपदं तस्मिन् खिति प्रत्यये उत्तरप[illegible]दे परे नामांतादेकस्वरात्पूर्वपदात्परस्या अमो लुप् स्यात्। स्त्रियंम
न्यः। नावंमन्यः। नामीति किं। इमंमन्यः। एकस्वरादिति किं। वधूमन्या [illegible] खितीति किं। स्त्रीमानी॥९ असत्वे ङसेः। असत्वे विहितस्य ङसेरुत्त
रपदे परे लुप् न स्यात्। स्तोकान्मुक्तः। असत्व इति किं। स्तोकं सत्ये उत्तरपद इत्येव। निःस्तोकः॥१० ब्राह्मणाच्छंसी। अत्र समासे ङसेर्लुप् प्राप्ता वा निपा
त्यते। ब्राह्मणाच्छंसिनो निपातनाद्वि[illegible] ब्राह्मणाच्छंसी॥११ ओजोंजःसहोंभस्तमस्तपसष्टः। एभ्यः परस्य टावचनस्योत्तरप
दे परे लुप् न स्यात्। ओजसाकृतं। अंजसाकृतं। सहसाकृतं। अंभसाकृतं। तमसाकृतं। तपसाकृतं। ट इति किं। ओजोभावः॥१२ पुंजनुषोनुजांधे। पुंजनु
र्भ्यां परस्य टा यथासंख्यं अनुज अंधे चोत्तरपदे लुप् न स्यात्। पुंसानुजः। जनुषांधः। ट इत्येव। पुमनुजः॥१३ आत्मनः पूरणे। आत्मनः परस्य टः पूरणप्रत्य
यांते उत्तरपदे लुप् न स्यात्। आत्मनाद्वितीयः। आत्मनाषष्ठः॥१४ मनसश्चाज्ञायिनि। मनस आत्मनश्च परस्य टआज्ञायिन्युत्तरपदे लुप् न स्यात्। मनसाज्ञायी।

३१

आत्मनाज्ञायी॥१५ नाम्नि। मनसः परस्य टः संज्ञाविषये उत्तरपदे परे लुप् न स्यात्। मनसादेवी। नाम्नीति किं। मनोदत्ता कन्या॥१६ परात्मभ्यां ङेः। आत्मनः
परस्य ङेर्वचनस्योत्तरपदे नाम्नि लुप् न स्यात्। परस्मैपदं। आत्मनेपदं। नाम्नीत्येव। परदत्तं॥१७ अदंतव्यंजनात्सप्तम्या बहुलं। अदंताद्व्यंजनांताच्च पर
स्याः सप्तम्या बहुलं नाम्नि लुप् न स्यात्। अरण्येतिलकाः। युधिष्ठिरः। अदंतव्यंजनादिति किं। भूमिपाशः। नाम्नीत्येव। तीर्थकाकः॥१८ प्राक्कारस्य व्यंजने। ज
लस्योरफान्ते[illegible]कारः प्रावोदतारः कारः तस्य संज्ञायां गम्यमानायाम् अदंतव्यंजनात्परस्याः सप्तम्याः अदंतव्यंजनादावुत्तरपदे लुप् न स्यात्। मुकुटेका
र्षापणः। समीषिमाषकः। प्राग् इति किं। यूपपशुः। उदीचामयं न प्रावोकार इति किं। अरण्येतिपशुः। व्यंजन इति किं। अविकटोरणः॥१९ तत्पुरुषे कृ
ति। अदंतव्यंजनात्परस्याः सप्तम्याः कृदंतोत्तरपदे तत्पुरुषे लुप् न स्यात्। स्तंबेरमः। सरसिकृतो। तत्पुरुष इति किं। [illegible] कारकः। अदंतव्यंजनादित्येव
।कुरुचरः॥२० मध्यांताद्गुरौ। अदंतव्यंजनात्परस्याः सप्तम्याः गु[illegible] गुरूत्तरपदे लुप् न स्यात्। मध्येगुरुः॥ [illegible] मूर्द्धमस्तकात्स्वांगादकामे। मू
र्द्धमस्तकवर्जात्स्वांगवाचिनो अदंतव्यंजनात्परस्याः सप्तम्याः कामवर्जे उत्तरपदे लुप् न स्यात्। कंठेकालः। अमूर्द्धमस्तकादिति किं। मूर्द्ध
शिखः। मस्तकशिखः। अकाम इति किं। मुखकामः॥२२ बंधे घञि नवा। बंधे घञंते उत्तरपदे व्यंजनात्परस्याः सप्तम्याः लुप् वा न स्यात्। हस्ते
बंधः हस्तबंधः। चक्रेबंधः। चक्रबंधः। घञीति किं। अजंतात्स्वबंधः॥२३ कालात्तनतरतमकाले। अदंतव्यंजनांता[illegible]त्परस्याः सप्तम्या
स्तनादिप्रत्ययेषु काले चोत्तरपदे लुप् वा स्यात्। पूर्वाह्णेतनः। पूर्वाह्णतनः। [illegible] पूर्वाह्णेतरे। पूर्वाह्णतरे [illegible]
र्वाह्णेकाले। पूर्वाह्णकाले। कालादिति किं। [illegible] शुक्लतरे। शुक्लतमे। अदंतव्यंजनादित्येव। रात्रितरायां॥२४ शयवासिवा[illegible]
लवाचिनो अदंतव्यंजनात्परस्याः सप्तम्याः एषूत्तरपदेषु लुप् वा न स्यात्। बिलेशयः। वनेवासी। वनवासी। ग्रामेवासः। ग्रामवा[illegible]दिति किं। भू
मिशायः॥२५ वर्षक्षरवराप्सरः [illegible]जात्। एभ्यः परस्याः सप्तम्या जे उत्तरपदे लुप् वा न स्यात्। वर्षेजः। वर्षजः। क्षरेजः। क्षरजः। वरेजः।
वरजः। अप्सुजः। अब्जः। सरसिजं। सरोजं। [illegible] उरसिजः। उरोजः। मनसिजः। मनोजः॥२६ [illegible] कालात्। एभ्यः परस्याः सप्तम्या जेउ[illegible]

त्तरपदस्य लुङ्न स्यात्। दिविजः। प्रावृषिजः। वर्षासुजः। शरदिजः। कालेजः॥२७ अप्सुयोनिमतिचरे॥ अपः परस्याः सप्तम्या यथाक्रमं योन्यादिष्व

उत्तरपदेषु लुङ्न स्यात्। अप्सव्यः। अप्सुयोनिः। अप्सुमतिः। अप्सुचरः॥२८ नेन्सिद्धबध्नेषु। इन्प्रत्ययांतसिद्धबद्धयोश्चोत्तरपदयोः सप्तम्या लुङ् स्यात्। स

त्यवर्घी। स्थंडिलवर्त्ती। सांकाश्यसिद्धः। समस्थः॥२९ षष्ठ्या आक्रोशे। उत्तरपदे परे आक्रोशे गम्ये षष्ठ्या लुङ्न स्यात्। चौरस्य कुलं॥३० पुत्रे वा। उक्ते उत्तर

पदे क्षेपे षष्ठ्या लुङ्वा न स्यात्। दास्याःपुत्रः। दासीपुत्रः॥३१ पश्यद्वाग्दिशो हरयुक्तिदंडे। पश्यः परस्याः षष्ठ्या यथासंख्यं हरादावुत्तरपदे लुङ्न स्यात्।

पश्यतोहरः। वाचोयुक्तिः। दिशोदंडः॥३२ अदसोऽकजायनणोः। अदसः परस्याः षष्ठ्या अकजंते उत्तरपदे आयनणि [...] लुङ्न स्यात्। आमुष्यु

त्रिकः। आमुष्यायणः॥३३ देवानांप्रियः। अत्र षष्ठ्या लुङ्न स्यात्। देवानांप्रियः॥३४ शेपपुच्छलांगूलेषु शुनः संज्ञायां। शुनः [...] परस्याः षष्ठ्याः शेपादि

षूत्तरपदेषु संज्ञायां लुङ्न स्यात्। शुनःशेपः। शुनःपुच्छः। शुनोलांगूलः॥३५ वाचस्पतिवास्तोष्पतिदिवस्पतिदिवोदासं। एतत्समासाः षष्ठ्या

अलुकि निपात्यंते। वाचस्पतिः। वास्तोष्पतिः। दिवस्पतिः। दिवोदासः॥३६ ऋतो विद्यायोनिसंबंधे। ऋदंतानां विद्यायोन्याव

ऋतसंबंधहेतोः सति प्रवृत्तानां षष्ठ्याः तत्संबंधहेतोः सति प्रवृत्त उत्तरपदस्य लुङ्न स्यात्। होतुःपुत्रः। पितुःपुत्रः। पितुरंतेवासी। ऋतामिति किं।

आचार्यपुत्रः। विद्यायोनिसंबंध इति किं। भर्तृगृहं॥३७ स्वसृपत्योर्वा। विद्यायोनिसंबंधनिमित्तानाम् ऋदंतानां षष्ठ्याः स्वसृपत्योरुत्तरपदयो

र्विद्यायोनिसंबंधनिमित्तयोर्लुङ्वा न स्यात्। मातुःष्वसा। मातृष्वसा। स्वसृपतिः। स्वसुःपतिः॥ विद्यायोनिसंबंध इत्येव। सर्वस्वसा [...] पतिः॥३८ आनङृतो द्वंद्वे। वि

द्यायोनिसंबंधनिमित्तानाम् ऋदंतानां द्वंद्वे तस्मिन्नुत्तरपदे पूर्वपदस्यानङ् स्यात्। होतापोतारौ। मातापितरौ। ऋतामित्येव। गुरुशिष्यौ। विद्यायोनि

संबंध इत्येव। कर्तृकारयितारौ॥३९ पुत्रे। पुत्रे उत्तरपदे विद्यायोनिसंबंधनिमित्तानाम् ऋदंतानां द्वंद्वे आनङ् स्यात्। मातापुत्रौ। होतापुत्रौ॥४० देवताद्वंद्वे च। वायु

देवतानां। एषां द्वंद्वे पूर्वपदस्योत्तरपदे आनङ् स्यात्। इंद्रासोमौ। वेद इति किं। ब्रह्मप्रजापती। सह इति किं। विष्णुशक्रौ। श्रुत इति किं। चंद्रसूर्यौ। वायुवर्जनं किं। अग्नि

मीदेवतानामिति किं। पूषखट्वाले॥४१ ईदग्नेः सोमवरुणयोः॥ वेदसहश्रुतावायुदेवतानां द्वंद्वे सोमवरुणयोरुत्तरपदयोरीः स्यात्। सोमेति निर्देशादाग्नेषत्वं

व। अग्नीषोमौ। अग्नीवरुणौ। देवताद्वंद्व इत्येव। आग्निसोमावटू॥४२ इद्वृद्धौ॥ विष्णुवर्जे वृद्धिमत्युत्तरपदे देवताद्वंद्वे अग्नेरिः स्यात्। आग्निवारुणी

मनड्वाहीमालभेत। वृद्धिमतीति किं। अग्नीवरुणौ। अविष्णाविति किं। आग्नावैष्णवं चरुं निर्वपेत्॥४३ दिवो द्यावा। देवताद्वंद्वे दिव उत्तरपदे द्यावादेशः स्या

त्। द्यावाक्षमा॥४४ दिवसश्च पृथिव्यां। देवताद्वंद्वे दिवः पृथिव्यामुत्तरपदे एतौ वा स्यातां। दिवस्पृथिव्यौ। दिवःपृथिव्यौ। द्यावापृथिव्यौ॥४५ उषासो

षसः। देवताद्वंद्वे उषस उत्तरपदे उषासा स्यात्। उषासासूर्यं॥४६ मातरपितरं वा। मातृपित्रोः पूर्वोत्तरपदयोः द्वंद्वे ऋतो रा वा निपात्यते। मातरपितर

रौ। मातापितरौ॥४७ वर्चस्कादिष्ववस्करादयः। एवमेते कृतसत्वाः समासा उत्तरपदाः साधवः स्युः। अवस्करोऽन्नमलं। अवकरोऽन्यः। अपस्करो रथां

गं। अपकारोऽन्यः॥४८ परतः स्त्री पुंवत् स्वेकार्थेऽनूङ्। ऊङ्परता विशेष्यवशात् स्त्रीलिंगा स्त्रीवृत्ता चेकार्थे उत्तरपदे पुंवत् स्यात्। मत्तडंतः। दर्शनीयभा

र्यः। परत इति किं। [...] नार्यः। स्त्रीति किं। खलपुदृष्टिः। स्वेकार्थ इति किं। रोहिणीनेत्रा। कल्याणीमाता। अनूङिति किं। करभोरूभार्यः॥४९ [...]

निचित्ततद्धितकृद्विमानि निवोत्तरपदपि तद्धितपरतः स्त्रीलिंगा [...] पुंवत्स्यात्। त्वपतायात। दर्शनीयमन्यमस्याः। अजघंवृत्ते॥५०

शतिश्च [...] तद्धितयस्वार। अन्या परतः स्त्रीजातिश्चणो प्रत्ययया दा [...] स्वरादौ तद्धिते विषयभूते पुंवत्स्यात्। अग्नेरूङ्पटव्यति। पत्यः नावकं

जातिः। दारद्यः गार्गः। तद्धित इति किं। हस्तिनीयति। हस्तिन्यः॥५१ पायद्यायी। एयप्रत्ययस्याप्यपरतः स्त्रीपुंवत्स्यात्। अग्नेयः पूर्वेण [...] नियमार्थमि

दं। त्रपेनयः॥५२ नाप्प्रियादौ। अप्प्रत्ययांतस्यैकार्थे उत्तरपदे प्रियादौ च परतः स्त्रीपुंवन्न स्यात्। कल्याणी पंचमा रात्रयः। कल्[...]प्रियः। अप्प्रियादाविति

किं। कल्याणपंचमीकः पक्षः॥५३ न तद्धिताकको पांत्यपूरणी स्या। तद्धितस्य कप्रत्ययस्य च ककोपांत्या या सांताः पूरणप्रत्ययांता संज्ञा च परतः स्त्री पुंव

न्न स्यात्। मद्रिकानार्यः। कारिकानार्यः। पंचमीनार्यः। दत्तानार्यः। न तद्धिताकेति किं। पाकनार्यः॥५४ न तद्धितः स्वरवृद्धिहेतुररक्तविकार। रक्तविकारात्म [...]

र्थः स्वरवृद्धिहेतुर्यस्तद्धितस्तदंतः परतः स्त्रीपुंवन्न स्यात्। माथुरीनार्यः। स्वर इति किं। वैयाकरणीनार्यः। वृद्धिहेतुरिति किं। अर्हद्रूपस्थनार्यः। आरक्तविकार इति

किं। काषायबृहतिका। लादिम॥५५ स्वांगाद्ङीर्जातिश्चामानिनि। स्वांगाद्या ङीस्तदंता जातिवाची च परतः स्त्रीपुंवन्न स्यात्। सुकेशमानिनी। दीर्घकेशीनार्यः

...ढीलार्यः। श्रद्धालार्यः। स्त्रीगादिति किं। पटुलार्यः। अमानिनीति किं। दीर्घा क अमानिनी॥ ५६ पुंवत्कर्मधारये परतः स्त्री ऊङ्कर्मधारये ... स्त्री कार्थेऽन्य
स्यादपरपुंवत्स्यात्। कल्याणप्रिया। म इकलार्या माधुर वृंदारिका॥ ५७ परतः स्त्री अनूङ् इति प्रत्यये पुंवत्स्यात्। पटुजातीया। कवयदेशीया॥ ५८
त्वतलगुणः परतः स्त्र्यनूङ् गुणवचनस्तु तयोः प्रत्यययोः पुंवत्स्यात्। पटुत्वं पटु ... गुण इति किं। क ... ॥ ५९ ... परतः ... पुंवत्स्यात्
महद्भूता कन्या। क्वचिदिति किं। गोमती भूता॥ ६० सर्वादयो स्यादौ। सर्वादिः परतः स्त्री पुंवत्स्यात्। न तु स्यादौ सर्वस्त्रियः। ... स्यादाविति किं। सर्वे
... ॥ ६१ मृगक्षीरादिषु वा। पशुसमासेषु परतः स्त्री उत्तरपदे पुंवद्वा स्यात्। मृगक्षीरं। मृगीक्षीरं। काकशावः। काकीशावः॥ ६२ ... रूपकल्पचेल
... तरादिषु प्रत्ययेषु ब्रुवादौ च ... स्त्री कार्थे उत्तरपदे ... पुंवद्वा स्यात्। पचतितरा। पचन्तीतरा। पचंतीत
रा। श्रेयसितरा। श्रेयस्तरा। श्रेयसीतरा। पचंतितमा। पचत्तमा। पचंती तमा। श्रेयसितमा। श्रेयस्तमा। श्रेयसीतमा। पचंतिरूपा। पचद्रूपा। पचं
तीरूपा। विदुषिरूपा। विद्वद्रूपा। विदुषीरूपा। पचंतिकल्पा। पच ... कल्पा। पचंतीकल्पा। विदुषिकल्पा। विद्वत्कल्पा। विदुषीकल्पा।
श्रेयसिकल्पा। श्रेयस्कल्पा। श्रेयसीकल्पा। पचंतिब्रुवा। पचद्ब्रुवा। पचंतीब्रुवा। श्रेयसिब्रुवा। श्रेयो ब्रुवा। श्रेयसीब्रुवा। एवं तिचेली। पचच्चे
ली। पचंतीचेली। श्रेयसिचेली। श्रेयश्चेली। श्रेयसीचेली। पचंतिगोत्रा। पचद्गोत्रा। पचंतीगोत्रा। श्रेयसिगोत्रा। श्रेयोगोत्रा। श्रेयसीगोत्रा। पचंतिमता। पचन्म
ता। पचंतीमता। श्रेयसिमता। श्रेयोमता। श्रेयसीमता। पचंतिहता। पचद्धता। पचंतीहता। श्रेयसिहता। श्रेयोहता। श्रेयसीहता॥ ६३ ऊङः। ऊङंतस्य परतः
स्त्रियाः स्तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेषु कार्थे ह्रस्वः स्यात्। ब्रह्मबंधुतरा। ... गौरितरा। गौरितमा। ... कल्पा ... ब्राह्मणब्रुवा। गौरिचेली। ...
। गौरिमता। गौरिहता॥ ६४ गोगवत्योरिमतानां स्त्रि। अनयोरर्थे तयोः संज्ञायां तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदे एकार्थे ह्रस्वः स्यात्। गोगवतितरा। गौरि
मतितमा। गोगवतिरूपा। गौरिमतिकल्पा। गोगवतिब्रुवा। गौरिमतिचेली। गोगवतिगोत्रा। गौरिमतिमता। गोगवतिहता। नाम्नीति किं। गोगवतीतरा। गोग
तीतरा॥ ६५ अनेकस्वराणां एकस्वरस्य ऊंतस्य परतरादौ प्रत्यये ब्रुवादौ चोत्तरपदे स्त्री कार्थे वा ह्रस्वः स्यात्। ... तरा। ... तरा। ... तरा। ... तमा। ... तमा। ...

ब्रुवादिबुवा ...
ब्रुवा। ब्रुवा। एकस्वराणामिति किं। कुटीतरा॥ ६६ ऊङः। ऊङंतस्य परतरादौ चोत्तरपदे स्त्री कार्थे ह्रस्वो वा स्यात्। ब्रह्मबंधुतरा। ब्रह्मबंधूत रा।
कद्रूब्रुवा॥ ६७ महतः करघासविशिष्टेषु करादावुत्तरपदे महतो डा वा स्यात्। महाकरः। महत्करः। महाघासः। महद्घासः। महाविशिष्टः। महद्विशि
ष्टः॥ ६८ स्त्रियां स्त्रीत्वात् महतः करादावुत्तरपदे नित्यं डाः स्यात्। महाकरः। महाघासः। महाविशिष्टः॥ ६९ जातीयैकार्थेऽच्वेः। महतो ड्यंतस्य जातीय
प्रत्यये एकार्थे चोत्तरपदे डाः स्यात्। महाजातीयः। महावीरः। जातीयैकार्थ इति किं। महत्तरः। अच्वेरिति किं। महद्भूता कन्या॥ ७० न पुंवन्निषेधे। महतः पुंवन्नि
षेधविषये उत्तरपदे डा न स्यात्। महती प्रियः॥ ७१ इच्यस्वरे दीर्घ आच्च। इजंतस्य स्वरादावुत्तरपदे पूर्वपदस्य दीर्घ आच्च स्यात्। मुष्टामुष्टि। मुष्टीमुष्टि। अस्व
र इति किं। अस्यसि॥ ७२ हविष्यष्टनः कपाले। हविष्यर्थे कपाले उत्तरपदे अष्टनो दीर्घः स्यात्। अष्टाकपालं हविः। हविषीति किं। अष्टकपालं। कपाल
इति किं। अष्टपात्रं हविः॥ ७३ गवि युक्ते। युक्तार्थे गवि उत्तरपदे अष्टनो दीर्घः स्यात्। अष्टागवं शकटं। युक्त इति किं। अष्टगुः क्षेत्रः॥ ७४ नाम्नि
अष्टन उत्तरपदे संज्ञायां दीर्घः स्यात्। अष्टापदः। कैलासः॥ मान्नीति किं। अष्टदंष्ट्रः॥ ७५ कोटरमिश्रकसिध्रकपुरगसारिकस्य च
णे। एषां वणे उत्तरपदे संज्ञायां दीर्घः स्यात्। कोटरावणं। मिश्रकावणं। सिध्रकावणं। पुरगावणं। सारिकावणं॥ ७६ अंजनादीनां
गिरौ। एषां गिरावुत्तरपदे नाम्नि दीर्घः स्यात्। अंजनागिरिः। कुक्कुटागिरिः॥ ७७ अनजिरादिबहुस्वरशरादीनां मतौ। अजिरादिवर्जबहुस्वरशरादी
नां मतौ प्रत्यये नाम्नि दीर्घः स्यात्। उदंबरावती। शरावती। वंशावती। अनजिरादीति किं। अजिरवती। हिरण्यवती॥ ७८ ऋ ... स्य मित्रे। ऋषावर्थे
मित्रे उत्तरपदे विश्वस्य नाम्नि दीर्घः स्यात्। विश्वामित्रः॥ ७९ नरे। नरे उत्तरपदे नाम्नि विश्वस्य दीर्घः स्यात्। विश्वानरः क्षचित्॥ ८० वसुराटोः। अनयोरुत्तरपद
योर्विश्वस्य दीर्घः स्यात्। विश्वावसुः। विश्वाराट्॥ ८१ वले च पित्र्यादेः। वले प्रत्यये पित्र्यादिवर्जानां दीर्घः स्यात्। कृषीवलः। अपित्र्यादेरिति किं। पितृ
वलः। मातृवलः॥ ८२ चितेः कचि दीर्घः स्यात्। एकचितीकः॥ ८३ स्वामिचिह्नस्याविष्टाष्टपंचभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य कर्णे। स्वामी चिह्नं
... विना विष्टादिवर्जस्य कर्णे उत्तरपदे दीर्घः स्यात्। दात्राकर्णः पशुः। स्वामिचिह्नस्येति किं। लंबकर्णः। विष्टादिवर्जनं किं। विष्टकर्णः।

अष्टकर्णः इत्यादि॥ ७४ गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ क्वौ। गतिकारकयोर्नह्यादौ क्विबंते उत्तरपदे दीर्घः स्यात्। पानत्। नीवृत्। प्रावृट्। आविद्। नीरुक्। ऋतीषह्। जलासह्। परीतत्॥ ७५ घञ्युपसर्गस्य बहुलं घञ्यंते उत्तरपदे उपसर्गस्य बहुलं दीर्घः स्यात्। नीहारः। नीवारः।

बहुलकात्। क्वचिन्न। घतः। वेशः। प्रतिवेशः। क्वचिन्निषादः। विषादः॥ ७६ नामिनः काशे। नाम्यंतस्योपसर्गस्य अजंतकाशे उत्तरपदे दीर्घः स्यात्। नी

काशः। वीकाशः। नामिन इति किं। प्रकाशः॥ ७७ दस्ति। दायस्थादिशादेशस्य स्मिन्परे नाम्यंतस्योपसर्गस्य दीर्घः स्यात्। नीत्तं। वीत्तं। दस्तीति किं। वितीर्णं। नी

ति किं। सुदत्तं॥ ७८ अपील्वादेर्वहे। पील्वादिवर्जस्य नाम्यंतस्य च वहे उत्तरपदे दीर्घः स्यात्। ऋषीवहं। मुनीवहं। अपील्वादेरिति किं। पीलुवहं। दारु

वहं॥ ७९ शुनः। अस्मादुत्तरपदे दीर्घः स्यात्। श्वादंतः। श्वावराहं॥ ८० षट्कादशषोडशषोडत्षोढाषड्ढा। एकादयो दशादिषु कृतदीर्घत्वादयो नि

पात्यंते एकादश षोडश षट्दंताश्चस्य षोडन् षोढा। षड्ढा॥ ८१ द्व्यष्टानां द्वात्रयोष्टाः प्राक् शतादनशीतिबहुव्रीहौ। एषांयथा

संख्यमेते प्राक् शतात्संख्यायामुत्तरपदस्थाः। नह्वशीतौ बहुव्रीहौ विषये द्वादश त्रयोविंशतिः अष्टात्रिंशत्। प्राक्शता

दिति किं। द्विशतं। त्रिशतं। अष्टसहस्रं। अनशीति बहुव्रीहाविति किं। द्व्यशीतिः। द्वित्राः॥ ८२ चत्वारिंशदादौ वा। द्व्यष्टानां प्राक् शताच्चत्वा

रिंशदादावुत्तरपदे यथासंख्यं द्वात्रयोष्टा वा स्युः। अनशीतिबहुव्रीहौ द्वाचत्वारिंशत्। द्विचत्वारिंशत्। त्रयश्चत्वारिंशत्। त्रिचत्वारिंशत्। अष्टाच

त्वारिंशत्। अष्टचत्वारिंशत्॥ ८३ हृदयस्य हृल्लासलेखाण्ये। अस्य लासलेखयोरुत्तरपदयोरणि यच्प्रत्यये च हृदिस्यात्। हृल्लासः। हृल्लेखः। हृद्य

म्॥ ८४ पदः पादस्याज्यातिगोपहते। पादस्याज्यादावुत्तरपदे पदः स्यात्। पदाजिः। पदातिः। पदगः। पदोपहतः॥ ८५ हिमहतिकाषियपद्। हिमादा

वुत्तरपदे यच्प्रत्यये पादस्य पद् स्यात्। पद्धिमं। पद्धतिः। पत्काषी। पद्याः शर्कराः॥ ८६ ऋचः शसि। ऋचां पादस्य शसादेशप्रत्यये पद् स्यात्। पच्छो गायत्री शंस

ति। ऋच इति किं। पादशः श्लोकं वक्ति। द्विशपाग्रत्यादिशासिन्स्यात्। ऋचः पादन्यूनं॥ ८७ शब्दनिष्कघोषमिश्रे वा। शब्दादावुत्तरपदे पादस्य पद् स्यात्।

पच्छब्दः। पादशब्दः। पन्निष्कः। पादनिष्कः। पद्घोषः। पादघोषः। पन्मिश्रः। पादमिश्रः॥ ८८ नस्नासिकायास्तःक्षुद्रे। नासिकायास्तस्प्रत्यये क्षुद्रे चोत्तरपदे

नस्स्यात्। नस्तः। नःक्षुद्रः॥ ८९ येऽवर्णे। नासिकाया यप्रत्ययेऽवर्णादन्यत्र परे नस्स्यात्। नस्यं। य इति किं। नासिक्यं पुरं। अवर्ण इति किं। नासिक्यावर्णः।

१०० शिरसः शीर्षन्। शिरसो ये प्रत्यये शीर्षन् स्यात्। शीर्षण्यः स्वरः। शीर्षण्यं तैलं। य इत्येव। शिरस्तः। शिरस्यति॥ १ केशे वा। शिरसः केशविषये यप्रत्यये शीर्षन्

स्यात्। शीर्षण्याः। शिरस्याः केशाः॥ २ शीर्षः स्वरे तद्धिते। शिरसः स्वरादौ तद्धिते शीर्षः स्यात्। हास्तिशीर्षिः। शीर्षिकः॥ ३ उदकस्योदः पेषंधिवासवाहने। उदकस्य पेषमा

दावुत्तरपदे उदः स्यात्। उदपेषं पिनष्टि। उदधिर्घटः। उदवासः। उदवाहनः॥ ४ वैकव्यंजने पूर्ये। उदकस्यासंयुक्तव्यंजनादौ पूर्यमाणार्थ उत्तरपदे उदादेशो वा स्या

त्। उदकुंभः। उदककुंभः॥ व्यंजन इति किं। उदकामत्रं। एक इति किं। उदकस्थाले। पूर्य इति किं। उदकादेशः॥ ५ मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहे वा

उत्तरपादेषूदकस्योदादेशो वा स्यात्। उदमंथः। उदकमंथः। उदौदनः। उदकौदनः। उदसक्तुः। उदकसक्तुः। उदबिंदुः। उदकबिंदुः। उदवज्रः। उदकवज्रः। उदभारः। उदक

भारः। उदहारः। उदकहारः। उदवीवधः। उदकवीवधः। उदगाहः। उदकगाहः॥ ६ नाम्न्युत्तरपदस्य च। उदकस्य पूर्वपदस्योत्तरपदस्य च संज्ञायामुदः

स्यात्। उदमेघः। उदवाहः। उदपानं। उदधिः। लवणोदः। कालोदः॥ ७ ते लुग्वा। संज्ञाविषये पूर्वोत्तरपदे लुग्वा स्यात्। देवदत्तः। दत्तः। देवः॥ ८ द्व्यंत

रनवर्णोपसर्गादप ईप्। द्व्यंतरौ अवर्णांतवर्जोपसर्गेभ्यश्च परस्याप उत्तरपदस्य ईप् स्यात्। द्वीपं। अंतरीपं। नीपं। समीपं। उपसर्गादिति किं। स्वापः। अ

नवर्ण इति किं। प्रापं। परापं॥ ९ अनोर्देशे उप्। अनोः परस्यापादेशे उप्। अनूपो देशः। देश इति किं। अन्वीपं वनं॥ १० खित्यनव्ययारुषो मोंऽतो

ह्रस्वश्च। खित्प्रत्ययांते उत्तरपदे मोंतो यथासंभवं ह्रस्वश्च स्यात्। जनंमन्यः। कालिंमन्यः। अरुंतुदः। अव्ययस्येति किं। दोषामन्यमहः॥ ११ सत्यागदास्तोः कारे। एभ्यः कारउत्तरपदे मांतः स्यात्। सत्यंकारः। अगदंकारः। अस्तुंकारः॥ १२ लोकंपृणम

ध्यंदिनानभ्याशमित्यं। एते कृतपूर्वपदमांता निपात्यंते। लोकंपृणः। मध्यंदिनं। अनभ्याशमित्यः॥ १३ भ्राष्ट्राग्नेरिंधे। आभ्यामिंधउत्तरपदे मांतः स्यात्। भ्राष्ट्रमिं

धः। अग्निमिंधः॥ १४ अगिलगिलगिले। गिलं तद्वर्जात्पूर्वपदात्परे गिलगिलोत्तरपदे मांतः स्यात्। तिमिंगिलः। अगिल इति किं। तिमिंगिलगिलः॥

१५ भद्रोष्णात्करणे। आभ्यां परे करणे उत्तरपदे मांतः स्यात्। भद्रंकरणं। उष्णंकरणं॥ १६ नवा खित्कृदंते रात्रेः। खिद्वर्जे कृदंते उत्तरपदे परे रात्रे

मौतावास्यात्। रात्रिंचरः रात्रिचरः। दिवाद्धर्जनं किं। रात्रिमन्यमदः। कृदंत इति किं। रात्रिसुखं। अंतग्रहणं किं। रात्रेः पितृ॥१७ नोर्त्तव्यायां॥ धनोर्त्तव्यायामुत्तरप
देऽ ओं तावास्यात्। धनुंतव्या धनुस्तव्या॥१८ अषष्ठीतृतीयादन्यादर्थे। अषष्ठीतृतीयांतादन्यादर्थे उत्तरपदे दींतावास्यात्। अन्यदर्थं। अन्यार्थं। षष्ठ्यादि
वर्जनं किं। अन्यस्य। अन्येन। वार्थो अन्यार्थः॥१९ आशीराशास्थितास्थासुकोतिरागे। एषूत्तरपदेष्वषष्ठीतृतीयादन्याद्द अंतः स्यात्। अदासी। अन्यदाशी। अन्य
दाशिस्थितः। अन्यदास्था। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रागः। अषष्ठीतृतीयादित्येव। अन्यस्य। अन्येन वा आशीः अन्याशीः॥२० ईयकारके अन्याद
ईये प्रत्यये कारके चोत्तरपदे दंतः स्यात्। अन्यदीयः। अन्यत्कारकः॥२१ सर्वादिविष्वग्देवाद्द्रिः क्वंच्यौ। सर्वादेर्विष्वग्देवाच्च पर क्विबंते अंचावुत्त
रपदे द्रिरंतः स्यात्। सर्वद्रीचः। द्र्यङ्। अदद्र्यङ्। विष्वग्द्र्यङ्। देवद्र्यङ्। क्वीति किं। विष्वगंचनं॥२२ सहसमः सध्रिसमि। अनयोः स्थाने क्विबंते अंचावुत्त
रपदे यथासंख्यं सध्रिसमी स्यातां। सध्र्यङ्। सम्यङ्। क्विबंते चावित्ये व। सहांचनं॥२३ तिरसस्तिर्यति। अकारादावंचावुत्तरपदे तिरसस्तिरिः
स्यात्। तिर्यङ्। अतीति किं। तिरश्चः॥२४ नञत्। उत्तरपदे परे नञ अः स्यात्। अचौरः। पंथाः। उत्तरपद इत्येव। न भुंक्ते॥२५ त्यादौ क्षेपे। त्या
दौ तपरे परे निंदायां गम्यमानायां नञ अः स्यात्। अपचसि त्वं जाल्म। क्षेप इति किं। न पचति चैत्रः॥२६ नगोऽप्राणिनि वा। अप्राणिन्यर्थे नगो
वा निपात्यते। नगः। अगः। गिरिः। अप्राणिनीति किं। अगो वृषली तन॥२७ नखादयः। एते ते दिशौ निपात्यंते। नखः। नासत्यः॥२८ अनुस्वारे स्वरा
दावुत्तरपदे नञो नुः स्यात्। अनंतो जिनः॥२९ कोः कत्तत्पुरुषे। स्वरादावुत्तरपदे कोस्तत्पुरुषे कद् स्यात्। कदश्वः। कदन्नं। तत्पुरुष इति किं। कूष्ट्रो राजा
। स्वर इत्येव। कुब्राह्मणः॥३० रथवदे। रथवदयोरुत्तरपदयोः कोः कद् स्यात्। कद्रथः। कद्वदः॥३१ तृणे जातौ। तृणे उत्तरपदे कोः कद् स्यात्। क
त्तृणं। जाताविति किं। कुतृणानि॥३२ कत्त्रिके। त्रिक उत्तरपदे कोः कद् स्यात्। कत्त्रयः॥३३ काक्षपथोः। अनयोरुत्तरपदयोः कोः का स्यात्। काक्षः। का
पथः॥३४ पुरुषे वा। पुरुषे उत्तरपदे कोः का वा स्यात्। कापुरुषः। कुपुरुषः॥३५ अल्पे। ईषदर्थस्य कोरुत्तरपदे का स्यात्। कामधुरं। काम्लं॥३६ काकवौ वोष्णे
। उष्णे उत्तरपदे कोः काकवौ वा स्यातां। कोष्णं। कवोष्णं। पक्षे यथाप्राप्तमिति तत्पुरुषे कदुष्णं। ॥३७ कृत्ये ऽवश्यमो लुक् ॥ ३५

त्यां ते उत्तरपादे ऽवश्यमो लुक् स्यात्। अवश्यकार्यं। कृत्य इति किं। अवश्यं लावकः॥३८ समस्ततहितवा ततेर्हिते चोत्तरपदे समो लुग्वा स्यात्। सततं। संततं। सहि
तं। संहितं॥३९ तुमश्च मनःकामे। तुमः समो मनसि कामे चोत्तरपदे लुक् स्यात्। लाकुमनाः। गंतुकामः। समनाः। सकामः॥४० मांसस्यानड्घञि पचि नवा। अ
नड्घञंते पचावुत्तरपदे मांसस्य लुग्वा स्यात्। मांस्पचनं। मांसपचनं। मांस्पाकः। मांसपाकः॥३९ दिक्शब्दात्तीरस्य तारः। अस्मात्परस्य तीरस्योत्तर
पदस्य तारो वा स्यात्। दक्षिणतारं। दक्षिणतीरं॥४० सहस्य सोऽन्यार्थे। उत्तरपदे परे बहुव्रीहौ सहस्य सो वा स्यात्। सपुत्रः। सहपुत्रः। अन्यार्थ इति किं। सह
कृत्वा॥४१ नाम्नि। उत्तरपदे परे बहुव्रीहौ सहस्य सः स्यात् संज्ञायां। साश्वत्थं वनं। अन्यार्थ इत्येव। सहदेवः कुरुः॥४२ अदृश्याधिके। अदृश्येऽधिके
ऽर्थे वर्तमाने उत्तरपदे बहुव्रीहौ सहस्य सः स्यात्। साग्निः कपोतः। सद्रोणा खारी॥४३ अकालेऽव्ययीभावे। अकालवाचिन्युत्तरपदे सहस्याव्ययीभावे स
स्यात्। सचक्रं सधुरं। अकाल इति किं। सहपूर्वाह्णं शेते। अव्ययीभाव इति किं। सहयुध्वा॥४४ ग्रंथांते। ग्रंथांतवाचिन्युत्तरपदे सहस्याव्ययीभावे सः
स्यात्। सकलं ज्योतिषमधीते॥४५ नाशिष्यगोवत्सहले। गवादिवर्जे उत्तरपदे आशिषि गम्यमानायां सहस्य सो न स्यात्। स्वस्ति गुरवे सहशि
ष्याय। आशिषीति किं। सपुत्रः। गवादिवर्जनं किं। स्वस्ति संसगवे। सवत्साय। सहवत्साय। सहलाय। सहहलाय॥४६ समानस्य धर्मा
दिषु। धर्मादावुत्तरपदे समानस्य सः स्यात्। सधर्मा। सनामा॥४७ सब्रह्मचारी। अयं निपात्यते॥४८ दृग्दृशदृक्षे। एषूत्तरपदेषु समानस्य सः स्यात्। सदृक्
। सदृशः। सदृक्षः॥४९ अन्यत्यदादेराः। अन्यस्य त्यदादेश्च दृगादावुत्तरपदे आः स्यात्। अन्यादृक्। अन्यादृशः। अन्यादृक्षः। त्यादृक्। त्यादृशः। त्यादृक्षः। अ
स्मादृक्। अस्मादृशः। अस्मादृक्षः॥५० इदंकिमीकी। दृगादावुत्तरपदे इदं किमो यथासंख्यं ईकी रूपौ स्यातां। ईदृक्। ईदृशः। ईदृक्षः। कीदृक्। की
दृशः। कीदृक्षः॥५१ अनञः क्त्वो यप्। अनञोऽव्ययात्पूर्वपदात्परं यदुत्तरपदं तदवयवस्य क्त्वो यप् स्यात्। प्रकृत्य। अनञ इति किं। अकृत्वा। परमकृत्वा
उत्तरपदस्येत्येव। अलं कृत्वा॥५२ पृषोदरादयः। एते साधवः स्युः। पृषोदरः। बलाहकः॥५३ वाऽवाप्योस्तनिक्रीधाञ्नहोर्वपी। अव अप्योरुपसर्गयोस्तनिक्रियार
पेक्षयोर्यथासंख्यं वपी वा स्यातां। वतंसः। अवतंसः। वक्रयः। अवक्रयः। पिहितं। अपिहितं। पिनद्धं। अपिनद्धं॥५४॥ ॥ इति तृतीयस्याध्यायस्य द्वितीय
॥ ... ॥

पादः समाप्तः॥ ग्रंथाग्रं १६००॥ ॥ अर्हं॥ वृद्धिरादैच्॥ आ आर् ए ओ प्रत्येकं वृद्धिसंज्ञाः॥ मार्ष्टि कार्यः। नायकः। अपगवः॥ १ गुणो ऽदरादात्। एतत्प्रत्ये
कं गुणसंज्ञः॥ कर्त्ता। चेता। स्तोता॥ २ क्रियार्थो धातुः॥ इति। क्रियापूर्वापरीभूतासा अर्थो यस्य स धातुः स्यात्। भवति। अत्ति। गोपायति। जुगुप्सते। पापच्यते। पुत्र
काम्यति। कुंडयति। उदयनः॥ ३ सनाद्यन्तः प्रत्ययः॥ आदिश्च तावत् प्रयोगस्यानुभवतः परश्चैव धातुरित्यर्थः। न चेत् ततः परः प्रत्ययः अस्मन्नायते। पुत्रायते प्रादि
रिति किं। अमदापुत्रीयति। अप्रत्यय इति किं। अश्वक्रीयति॥ ४ अदाबदा ध्वेदादाप्रसक्तो धातुरविदो दास्यात्। दामुप्रणिदाता। दद्रूप्रणिदयते। उदंग्
प्रणिदत्तातिं। दौ प्रणिद्यति। दं प्रणिधयति। उधंक प्रणिदधाति। अदाविति किं। दांवदांत वर्हिः। देवं अवदातं मुखं॥ ५ व त्तमानानि नूनमत्रिति।
सिवूथ मूथ सिवूवसूमसू। तै आते अंते। सेओथे ध्वे। एवहेमहे। इमानि वचनानि वर्त्तमानास्यः॥ १ सप्तमी। यात् यातां युस्। यास् यातं यात।
यां याव याम। ई ईयातां ईरन्। ईथाम् ईयाथां ईध्वं। ईय ईवहि ईमहि। इमानि वचनानि सप्तमीसंज्ञः॥ २ पंचमी तु तोअंतु हि तं त। आ
नि आव आम। तां आतां अंतां। स्व आथां ध्वं। ऐ आवहै आमहै। इमानि वचनानि पंचमीस्यः॥ ३ ह्यस्तनी। दिव्तां
अन्। सिव तं त। अमु व म। त आतां अंत। थास् आथां ध्वं। इ वहि महि। एतानि वचनानि ह्यस्तनीस्यः। एतास्वतस्त्रः शिलाज्ञे याः
भवति। नवेत्। भवत्। अभवत्॥ ४ अद्यतनी। दितां अन्। सितं त। अमु व म। त आतां अंत। थास् आथां ध्वं। इ वहि महि। इमानि वचनानि अद्यतनीस्यः
॥ ५ परोक्षा। णव् अतुस् उस्। थव् अथुस् अ। णव् व म। ए आते इरे। से आथे ध्वे। ए वहे महे। इमानि वचनानि परोक्षासंज्ञः॥ ६ आशीः॥ यात् यास्तां यासुस्
यास् यास्तं यास्त। यासं यास्व यास्म। सीष्ट सीयास्तां सीरन्। सीष्ठाः सीयास्थां सीध्वं। सीय सीवहि सीमहि। इमानि वचनानि आशीःसंज्ञः॥ ७ श्व
स्तनी। ता तारौ तारस्। तासि तास्थस् तास्थ। तास्मि तास्वस् तास्मस्। ता तारौ तारस्। तासे तासाथे ताध्वे। ताहे तास्वहे तास्महे। एतानि वचनानि श्वस्त
नीस्यः॥ ८ भविष्यंती। स्यति स्यतस् स्यंति। स्यसि स्यथस् स्यथ। स्यामि स्यावस् स्यामस्। स्यते स्येते स्यंते। स्यसे स्येथे स्यध्वे। स्ये स्यावहे स्यामहे। एतानि
वचनानि भविष्यंतीस्यः॥ ९ क्रियातिपत्तिः। स्यत् स्यतां स्यन्। स्यस् स्यतं स्यत। स्यं स्याव स्याम। स्यत स्येतां स्यंत। स्यथास् स्येथां स्यध्वं। स्ये स्यावहि स्यामहि ३६

इमानि वचनानि क्रियातिपत्तिस्यः॥ १० त्रीणि त्रीणि अन्ययुष्मदस्मदि। सर्वासां विभक्तीनां त्रीणि त्रीणि वचनानि। अन्य युष्मदर्थे अस्मदर्थे
यथाक्रमं स्युः। स पचति। तौ पचतः। ते पचंति। पचते। पचेते। पचंते। त्वं पचसि। युवां पचथः। यूयं पचथ। पचसे। पचेथे। पचध्वे। अहं पचा
मि। आवां पचावः। वयं पचामः। पचे। पचावहे। पचामहे। एवं सर्वासु। द्वयोर्योगे परः। अयमेव वचनं। स च त्वं च पचथः। स च त्वं च अहं च पचा
मः॥ ११ एकद्विबहुषु। अन्यादिषु त्रीणि त्रीणि एकद्विबहुषु यथासंख्यं स्युः। स पचति। तौ पचतः। ते पचंति इत्यादि॥ १२ नव
आद्यानि शतृक्वसू च परस्मैपदं। सर्वासां विभक्तीनामाद्यानि नव नव वचनानि शतृक्वसू च परस्मैपदसंज्ञः। तिव् तस् अंति। सिव् थस् थ। मि
व् वस् मस्। एवं सर्वासु॥ १३ पराणि कानानशौ चात्मनेपदं। सर्वासां विभक्तीनां पराणि नव नव वचनानि कानानशौ चात्मनेपदसंज्ञः। ते
आते अंते। से आथे ध्वे। ए वहे महे। एवं सर्वासु॥ १४ तत्साप्यानाप्यात् कर्मभावे कृत्यक्तखलर्थाश्च। तत्साप्यानाप्यात् कर्मभावे कृत्यक्तखलर्थाश्च अ
नयात् सकर्मकात् कर्मणि अकर्मकात् भावे। कर्मण्यात्मनेपदं सावेस्युः। क्रियते कटः स्तुत्रेण। चक्राणः। क्रियमाणः। स्वयते
न्नियमानं क्रियतां मृदु पच्यते। कार्यः कर्तव्यः करणीयः। कटः। कृतः कटस्त्वया। शयितव्यं शेयं शयनीयं कार्यं कर्तव्यं। क
रणीयं दयं कृतः त्वया। कृतं कटः। शयितं त्वया। सुकरः कटस्त्वया। सुशयं सुकरं त्वया। सुकटंकराणि वीरणानि। ईषदाढ्यंभवं भवता। सु
ज्ञानं तन्मुनिना। सुस्नानं नदीनेना। मासमास्यते मासमास्यते॥ १५ इङितः कर्त्तरि। इदित ङितश्च धातोः कर्त्तर्यात्मनेपदं स्यात्। एधते। पश्यमा
नः। शयानः॥ १६ क्रियाव्यतिहारे ऽगतिहिंसार्थशब्दार्थहसो ह्वस्थानन्योन्यार्थे। अन्यविकीर्षितायां क्रियायामन्येन करणे क्रियाव्यति
हारः। तद्विषये गति हिंसा शब्दार्थवर्जितात् प्रवहति। सामकर्त्तर्यात्मनेपदं स्यात्। न चेदन्योन्ये तरेतरपरस्पर। व्यतिलुनते। व्यति
हरंति। व्यतिवहंति भारं। क्रियेति किं। द्रव्यव्यतिहारमात्रेण। व्यतिहसंति। व्यतिलुनंति। गत्यर्थादिवर्जने किं। व्यतिसर्पंति। व्यतिहिंसंति। व्यतिज
ल्पंति। व्यतिहसंति। अनन्योन्यार्थ इति किं। परस्परस्य व्यतिलुनंति। कर्त्तरीत्येव। तेन लाव कर्मणा। पूर्वेणैव गत्यर्थादिभ्यो विस्यात्। व्यतिगम्यते या
सकर्मकात् कर्मणि कः। अकर्मकाद् विवक्षितकर्मका भावे कः। ६

×स्किरः। अपाकिरते मस्मद्धा कर्त्तर्यात्मनेपदं स्यात्। अपस्किरते वृषभो हृष्टः मट्टनिर्देशः तिकिं अपकिरति॥३०३ दअरः सोप्या×६

माः॥ २३ निर्विशः॥ नेर्विशः॥ कर्त्तर्यात्मने पदं स्यात् निर्विशते॥ २४ उपसर्गादस्यो [illegible] वा। उपसर्गात्परा स्यात्म स्यत्पू हिस्याकर्त्तर्यात्मनेपदं वा स्यात्

विपर्यस्यति विपर्यस्यते। समूहति। समूहते॥ २५ उदश्चरा युजरयजत [illegible] त्पाच॥ उदः श्चरांता यापसर्गात्परा युनक्तेः कर्त्तर्यात्म नेपदं स्यात्। न

द्यश्चेयते त्पात्रंत हिषयो युज्य र्थः स्यात्। उद्युं क्ते। उपयुंक्ते। उद्धरादिति किं। सं युनक्ति। अयज्ञतत्पात्र इति किं द्वं द्वं यज्ञ पात्राणि प्रयुनक्ति॥ २६॥

परिव्यवा क्रियः॥ एभ्य उपसर्गेभ्यः परात् क्रीणातेः कर्त्तर्यात्मनेपदं स्यात्। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। उपसर्गादित्येव। उपरि क्रीणाति

॥ २७ पराविजेः॥ आभ्यां पराज्जयतेः कर्त्तर्यात्मनेपदं स्यात्। पराजयते। विजयते॥ २८ समः क्ष्णुः। समः परात् क्ष्णौतेः कर्त्तर्यात्मनेपदं स्यात्। संक्ष्णुते शस्त्रं ×ना×

समइति किं क्ष्णौति। उपसर्गादित्येव। आयसं क्ष्णौति॥ २९ अपे [illegible] नू उ सूर्वाचरः सकर्मकात् कर्त्तर्यात्मनेपदं स्यात्। मार्गमुच्चरते। सोप्या इति

किं। धूममुच्चरति॥ ३१ समस्तृतीयया। संपूर्वाच्चरः तृतीयांतेन योग [illegible] कर्त्तर्यात्मने पदं स्यात्। अश्वेन संचरते। तृतीययेति किं। उभौ लो

को संचरति॥ ३२ क्रीडोऽकूजने। कूजनमव्यक्तशब्दः। न तोन्यार्था [illegible] संपूर्वात्क्रीडः कर्त्तर्यात्मनेपदं स्यात्। संक्रीडते। समइत्येव

क्रीडति। अकूजन इति किं। संक्रीडंत्यनांसि॥ ३३ अन्वाङ्परिभ्यः [illegible] रात्क्रीडः कर्त्तर्यात्मनेपदं स्यात्। अनुक्रीडते। आक्रीडते। परिक्री

डते॥ ३४ शपउपलंभने। उपलंभनं प्रकाशनं शपथो वा तदर्थाच्छपः क [illegible] र्त्तर्यात्मनेपदं स्यात्। मैत्राय शपते। उपलंभन इति किं। मैत्रं शपति॥ ३५

आशिषिनाथः। आशीरर्थाद्वनाथः कर्त्तर्यात्मनेपदं स्यात्। सर्पिषो नाथते। आशिषीति किं। मधुना नाथति॥ ३६ भुजो नवने। पालनादन्यार्थाद्भुजः

कर्त्तर्यात्मनेपदं स्यात्। ओदनं भुंक्ते। भुनज इति किं। ओष्ठौ निर्भुजति। अत्राणइति किं। पृथ्वीं भुनक्ति॥ ३७ हृगोगततांच्छील्ये। गतं सा [illegible] हृगंपरू गागततांच्छी

[illegible] नाटारामनुहरति॥ ३८ पूजाचार्यकभृत्यु नू के पज्ञानविगणनव्ययनियः। पूजादिषु गम्येषु नियः कर्त्तर्यात्मनेपदं स्यात्। नयते विद्वान् स्या

द्वादे। माणवकमुपनयते। कर्मकरानुपनयते। धीश्रमुदानयते। नयते तत्त्वार्थं। मद्राः करं विनयंते। शतं विनयते। एष्विति किं। अजां नयति ग्रामं॥ ३९ कर्त्तृ

स्थामूर्त्तायात्। कर्त्तृस्थममूर्त्तं कर्म यस्य तस्मान्नियः कर्त्तर्यात्मनेपदं स्यात्। श्रमं विनयते। कर्त्तृस्थ इति किं। चैत्रो मैत्रस्य मन्युं विनयति। अमूर्त्त इति किं। गडुं विन ३७

×न्या शिशुः कर्त्तर्यात्मनेपदं स्यात्। पितृकमश्वा अनुहरंते पितुरनुहरते। गते इति किं पितुर्हरति। चारस्य तीत्पर्थं ताच्छील्य इति किं ×३-२

यति। आप्य इति किं। बुद्ध्या विनयति॥ ४० शदः शिति। शिद्विषयाच्छदः कर्त्तर्यात्मनेपदं स्यात्। शीयते। शीतीति किं। शत्स्यति॥ ४१ म्रियतेरद्यतन्याशीःषि च। अद्य

×निद्रायति४ तन्याशीर्विषया चिषयाच्च कर्त्तर्यात्मनेपदं स्यात्। अमृत। मृषीष्ट। म्रियते। अद्यतन्याशीःषि चेति किं। ममार॥ ४२ कषूषानवा। कषूषेतां कर्त्तर्यात्मने

पदं स्यात्। निद्राय [illegible] ते॥ ४३ व्यद्भ्योऽद्यतन्यां व्यद्भ्य आदिभ्योऽद्यतनीविषये कर्त्तर्यात्मनेपदं वा स्यात्। व्यद्युतत्। व्यद्योतिष्ट। असृवत्। असारिष्ट। अद्यतन्या

इति किं। द्योतते॥ ४४ वृद्भ्यः स्यसनोः। वृतादिः पंचतः स्यादौ प्रत्यये सनि च विषये कर्त्तर्यात्मनेपदं वा स्यात्। वर्त्स्यति। वर्तिष्यते। विवृत्सति। विवर्तिषते। स्यस

नोरिति किं। वर्त्तते॥ ४५ क्लृपः श्वस्तन्यां। क्लृपः श्वस्तनीविषये कर्त्तर्यात्मनेपदं स्यात्। कल्प्तासि। कल्पितासे॥ ४६ क्रमोऽनुपसर्गात्। अतः कर्त्तर्यात्मनेपदं वा

स्यात्। क्रमते। क्रामति। अनुपसर्गादिति किं। संक्रामति॥ ४७ वृत्तिसर्गताय [illegible] ने। वृत्तिरप्रतिबंधः। सर्ग उत्साहः। तायनं स्फीतता। एतद्वृत्तेः क्रमः कर्त्तर्यात्म

नेपदं स्यात्। शास्त्रेऽस्य क्रमते बुद्धिः। सूत्राय क्रमते। क्रमंते स्मिन्योगा [illegible] ॥ ४८ परोपात्। आभ्यामेव पराक्रमेर्वृत्त्याद्यर्थात्कर्त्तर्यात्मनेपदं स्यात्। प

×उपक्रमते× राक्रमतोऽपराद्परादिति किं। संक्रामति। वृत्त्यादावित्येव। पराक्रामति [illegible] ॥ ४९ विः पादविहरणे। वाद्यार्थः पादविहरणे तदर्थाद्विपूर्वात्क्रमेः कर्त्तर्यात्म

नेपदं स्यात्। साधु विक्रमते गजः। वाद्यार्थ इति किं। गजेन विक्रमति॥ ५[illegible] ० प्रोपादारंभे। आरंभार्थाभ्यां प्रोपाभ्यां पराक्रमेः कर्त्तर्यात्मनेपदं स्यात्।

प्रक्रमते। उपक्रमते। [illegible] सोऽत्तुं। आरंभ इति किं। प्रक्रामति याति [illegible] त्यर्थः॥ ५१ आङो ज्योतिरु [illegible] द्गमे। आङः पराक्रमेः ज्योतिरुद्गमार्थात्कर्त्त

र्यात्मनेपदं स्यात्। आक्रमते चंद्रः सूर्यो वा। ज्योतिरुद्गम इति किं। आक्रमति बटुः कुतपं। धूममाक्रामति॥ ५२ दागोऽस्वास्यप्रसारविकासात्। स्वास्यप्रसारवि

कासाभ्यामन्यार्थाद्दाङ्पूर्वाद्दागः कर्त्तर्यात्मनेपदं स्यात्। विद्यामादत्ते। स्वास्यादिवर्जनं किं। उष्ट्रो मुखं व्याददाति। कूलं व्याददाति॥ ५३ नुप्रच्छः। आङ्पूर्वान्नो

नेः प्रच्छेश्च कर्त्तर्यात्मनेपदं स्यात्। आनुते शृगालः। आपृच्छते गुरून्॥ ५४ गमः क्षांतौ। कालहरणार्थाद्गमयतेराङ्पूर्वात्कर्त्तर्यात्मनेपदं स्यात्। आगमयते गु

रुं। किं विकालं प्रतीक्षते। क्षांताविति किं। विद्यामागमयति॥ ५५ ह्वः स्पर्द्धे। आङ्पूर्वात् ह्वयतेः स्पर्द्धे गम्ये कर्त्तर्यात्मनेपदं स्यात्। मल्लो मल्लमाह्वयते। स्पर्द्ध

इति किं। गामाह्वयति॥ ५६ संनिविभ्यः। एभ्यो ह्वयतेः कर्त्तर्यात्मनेपदं स्यात्। संह्वयते। निह्वयते। विह्वयते॥ ५७ उपात्। उपात् ह्वयतेः कर्त्तर्यात्मनेपदं स्यात्। उ

पद्धयते॥५८ यमः स्वीकारे। उपाद्यमेः स्वीकारार्थात्कर्त्तर्यात्मनेपदं स्यात्। कन्यामुपयच्छते। उपायंस्त महास्त्राणि ... दिशाः किं। शाटकानुपयच्छ
ति॥५९ देवार्चामैत्रीसंगमपथिकर्त्तृकमंत्रकरणेस्थः एतदर्थादुपपूर्वात्तिष्ठतेः कर्त्तर्यात्मनेपदं स्यात्। देवार्चा। जिनेंद्रमुपतिष्ठते। मैत्री २ विका
उपतिष्ठते। संगमः। गंगा यमुनामुपतिष्ठते। पंथाः कर्त्ता यस्मिन्तत्र सुघ्नमुपतिष्ठते पंथाः ... मंत्रः करणं यस्य तत्र ऐंद्र्या गार्हपत्यमुपतिष्ठते ६०
वालिप्सायां। उपाल्लिप्सायामप्राप्यां कर्त्तर्यात्मनेपदं वा स्यात्। भिक्षुर्दातृकुलमुपतिष्ठते। उपतिष्ठति वा॥६१ उदोनूर्द्ध्वेहे। अनूर्द्ध्वार्थचे
ष्टानदर्थादुत्पूर्वात्स्थः कर्त्तर्यात्मनेपदं स्यात्। मुक्तावुत्तिष्ठते। अनूर्द्ध्वे ... ति किं। आसनादुत्तिष्ठति ... ईहे इति किं। ग्रामाच्छतमुत्तिष्ठति॥६२ संविप्रा
वात्। एभ्यः परात्स्थः कर्त्तर्यात्मनेपदं स्यात्। संतिष्ठते वितिष्ठते। प्र तिष्ठते। अवतिष्ठते॥६३ ज्ञीप्सास्थेयाख्यायां। ज्ञीप्सा आत्मप्रकाशनं। स्थेयः
स एवस्थः ज्ञीप्सायां स्थेयविषयार्थे वर्त्तमानात्स्थः कर्त्तर्यात्मनेपदं स्यात्। तिष्ठते कन्या छात्रेभ्यः। त्वयि तिष्ठते विवादः॥६४ प्रतिज्ञायां
अभ्युपगमार्थात् स्थः कर्त्तर्यात्मनेपदं स्यात्। नित्यं शब्दमातिष्ठते॥६५ समो गिरः। संपूर्वाद्गिरः प्रतिज्ञार्थात्कर्त्तर्यात्मनेपदं स्यात्।
स्याद्वादं संगिरते॥६६ अवात्। अवाद्गिरः कर्त्तर्यात्मनेपदं स्यात्। अवगिरते॥६७ निह्नवे ज्ञः। निह्नवोऽपलापः तदर्थाज्ज्ञः कर्त्तर्यात्मनेपदं
स्यात्। शतमपजानीते॥६८ संप्रतेरस्मृतौ। स्मृतेरन्यार्थात्संप्रतिभ्यां पराज्ज्ञः कर्त्तर्यात्मनेपदं स्यात्। शतं संजानीते। प्रतिजानीते वा। अस्मृ
ताविति किं। मातुः संजानाति॥६९ अननोः सनः। सन्नंतान्ज्ञः कर्त्तर्यात्मनेपदं स्यात्। नत्वनोः परात्। धर्मं जिज्ञासते। अननोरिति किं। धर्ममनुजिज्ञा
सति॥७० श्रुवोऽनाङ्प्रतेः। सन्नंतात् शृणोतेः कर्त्तर्यात्मनेपदं स्यात्, नत्वाङ्प्रतिपरात्। शुश्रूषते गुरून्। अनाङ्प्रतेरिति किं। आशुश्रूषति प्र
तिशुश्रूषति॥७१ स्मृदृशः कर्त्तर्यात्मनेपदं स्यात्। सुस्मूर्षते। दिदृक्षते॥७२ शको जिज्ञासायां। शकोज्ञानानुसंहितार्थात्सन्नंतात्कर्त्तर्यात्मनेपदं स्या
त्। विद्यां शिक्षते। जिज्ञासायामिति किं। शिक्षति॥७३ प्राग्वत्। सनः पूर्वो योऽनुबंधस्मादिव सन्नंतात् कर्त्तर्यात्मनेपदं स्यात्। शिशयिषते। अध्येनसं
त्सिविषते॥७४ आमः कृगः। आमः परात्तु प्रयुक्तात्कृगः। आमप्रवृत्ययोऽनुप्रस्मादिव कर्त्तर्यात्मनेपदं स्यात्। नवतिनत्तवतिवतिविधिनिषेध ३८
+श्रीत्यां दीनं तात्यां+३

×ति×
वादिविप्रत ईहिं वक्रे विलयांवकारकृग इति किं। ईं ... हसमास्थ॥७५ गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगे। एतदर्थात्कृगः कर्त्तर्यात्मनेपदं स्यात्। गं
धनद्रोहेण परदाराभिघटनं। उत्कुरुते। अवक्षेपः कुत्सनं। दुर्जनानवकुरुते। सेवा महामात्रानुपकुरुते। साहसिक्ये विशृंखलप्रवृत्तिः। परदारान्प्रकुरुते।
प्रतियत्नः एधोदकस्योपस्कुरुते। प्रकथनं जनापवादान् प्रकुरुते उपयोगो धर्मादौ विनियोगः। शतं प्रकुरुते॥७६ अधः प्रसहने। अधः परात्कृ
गः प्रसहनार्थात्कर्त्तर्यात्मनेपदं स्यात्। प्रसहनं पराभिभवः पराजयो वा। तं ह ... अधिचक्रे। प्रसहन इति किं। तमधिकरोति॥७७ दीप्तिज्ञानयत्नविमत्यु
पसंभाषोपमंत्रणे वदः। एतदर्थाद्भूगम्याद्वदः कर्त्तर्यात्मनेपदं स्यात्। दीप्तिर्भासनं। वदते विद्वान् स्याद्वादे। ज्ञानं वदते मीमांसकार्थं। यत्नः। तपसि वदते। ना
नामतिर्विमतिः। धर्मे विवदंते। उपसंभाषणमुपलोभनं। कर्मकरानुपवदते। उपमंत्रणं रहस्युपच्छंदनं कलत्रमुपवदते॥७८ व्यक्तवाचां समुच्चारणे। व्यक्तवा
चोऽस्फुटाक्षरभाष्यादयः। तेषां समुच्चारणार्थाद्वदः कर्त्तर्यात्मनेपदं स्यात्। संप्रवदंते ग्राम्याः। व्यक्तवाचामिति किं। संप्रवदंति शुकाः। अदेक्का
विति किं। यत्र णाकमित्रावदति॥७९ विभाषा विप्रलापे। विरुद्धार्थवादो विवादः। व्यक्तवाचां विवादरूपस्य हारव्यर्थाद्वदः कर्त्तर्यात्मनेपदं स्यात्। विप्र ×का×
+विप्रवदंति ९ वदंति वा मोहूर्त्ताः। विवाद इति किं। संप्रवदंते वैयाकरणाः स्याद्वादा वित्यवा मोहूर्त्ताः मोहूर्त्तेन क्रमा दिप्रवदति॥८० अनोः कर्मण्यसति। व्य
क्तवाचामर्थवर्त्तमानादनुपूर्वाद्वदः कर्मण्यसति कर्त्तर्यात्मनेपदं स्यात्॥ चनुवदते वत्रो मेचस्य। कर्मण्यसतीति किं। उक्तमनुवदति। व्यक्तवाचामित्ये
व। अनुवदति वीणा॥८१ ज्ञः। जानातेः कर्मण्यसति कर्त्तर्यात्मनेपदं स्यात्। सर्पिषो जानीते। कर्मण्यसतीत्येव। तैलेस्पर्पिषो जानाति॥८२ उपात्स्थः। अत क
र्मणोस्थ इति कर्त्तर्यात्मनेपदं स्यात् योगयोगउपतिष्ठते। कर्मण्यसतीत्येव। राजानमुपतिष्ठति॥८३ समो गम्यृच्छिप्रच्छिस्वरत्यर्त्तिश्रुविदिभ्यः। संपूर्वेभ्य एभ्यः कर्म
विकलि ण्यसति कर्त्तर्यात्मनेपदं स्यात्। संगच्छते। समृच्छिष्यते। संपृच्छते। संशृणुते। संवित्ते। संस्वरते। समृच्छते। समियृत संपश्यते। कर्मण्यसतीत्येव। संगच्छति मेदं
॥८४ वेः कृगः शब्दे वानाशे। अनाशार्थाद्विपूर्वात्कृगः कर्मण्यसति शब्दकर्मणि कर्त्तर्यात्मनेपदं स्यात्। विकुर्वते सैंधवाः। क्रोष्टा विकुरुते स्वरान्। शब्द
इति किं। विकरोति मृदं। अनाशे इति किं। विकारास्यधर्म यं॥८५ आङो यमहनः। स्वांगे च। आङः पराभ्यां यमहन्भ्यां कर्मण्यसति कर्तृ। स्वांगे च कर्मणि कर्त्त

+द।श्री३

नेपदंस्यात्। आयच्छते। आहते। आयच्छते। आहतवान्। पादौ। स्वांगत्वात् किं। आयच्छति वृक्षं॥६६ कूर्दस्वपः आस्यां परात्तापः कर्मण्यकर्तृकर्मणि स्वांगवकर्मणिकर्तृ
र्यात्मनेपदंस्यात्। वितपते। उत्तपते। वितपतः। उत्तपते पाणिं॥६७ आणिकर्मणि कर्तृ णिगोऽस्मृतौ। अणिगवस्थायां यत्कर्म स एव णिगवस्था
यां कर्ता यस्य तस्मा णिगंताद् अस्मृत्यर्थात् कर्तर्यात्मनेपदंस्यात्। आरोहयते हस्तिपकान् अणि गिति किं। आरोहयति हस्तिपकान्महामात्रः। आ
रोहयति महामात्रेण हस्तिपकाः। णितैः किं। गणयति गणो गोपालकं। कर्मेति किं। दर्शयति प्रदीपान्। तेजो दीपाः पश्यति। णिगिति किं। लुनाति केदारं चैत्रः। लूयते
केदारः स्वयमेव। तं प्रयुंक्ते लावयति केदारं चैत्रः। कर्त्रेति किं। आरोहयति हस्तिनं हस्तिपकाः। नाने॥ रोहयति। दृष्टीयत्वाणि गिमात्स्वत्वे अस्मृता विति किं
। स्मरयति वनगुल्मः। कोकिलः॥६८ प्रलंभश्च विवंचेः। आस्यां णिगंतास्यां वंचना त्वा प्रलंभो अर्थस्यांकर्तर्यात्मने। पदंस्यात्। गृध्रमेव अतिकोक्षायां। वृद्धं गर्धयते वं
चयते वा। प्रलंभ इति किं। श्वानं गर्धयति॥६९ लीङ्लिनोर्व्यालिनवेयाच्या कर्तर्यपि। आस्यां णिगंतास्यामर्चा निसव प्रलंभश्चार्थस्यांकर्तर्यात्मनेपदं
स्यात्। आवान्योरकर्तर्यपि अर्वाजिटा। निरालापयते। अतिन वः॥ टयनोवर्त्तिका मुपलापयते। प्रलंभः कस्मात्त्वम्लापयते। अकर्त्त
र्यति किं। जटा निरालाप्यति जटिलन॥७० स्मिङः प्रयोक्तुः स्वार्थे। प्रयोक्तृ तोयः स्वार्थः स्मयस्तदर्थाणिगंतात् स्मिङः कर्तर्यात्मनेपदंस्यात्। आवा
स्याकर्तर्यपि जटिला विस्मापयते। प्रयोक्तुः स्वार्थ इति किं रूपेण विस्माय यति। अकर्तर्यपीत्येव विस्मापनं॥७१ बिभेतर्तीष् च। प्रयोक्तृतः स्वार्थे
ते णिंता भियः कर्तर्यात्मनेपदंस्यात्। अस्य षत्वं च। पक्षे आकाकर्तर्यपीति। मुंडो भीषयते। भापयते वा। प्रयोक्तुः स्वार्थ इत्येव। कुंचिकया भाययति। अ
कर्तर्यपीत्येव भीषा। भापनं॥७२ मिथ्याकृगोऽभ्यासे। मिथ्यायुक्तात्कृगो णिजंता क्रियाभ्यासवृत्तेः स्वार्थे कर्तर्यात्मनेपदंस्यात्। पदं मिथ्याकारयते। मिथ्येति किं
। पदं साधु कारयति। अभ्यास इति किं सकृत् पदं मिथ्याकारयति॥७३ परिमुहायमायसपाद्धेवदवसदमादरुचिनृतः फलवति। प्रधानफलवति कर्तरि वि
वक्षिते एभ्यो णिगंतेभ्य आत्मनेपदंस्यात्। परिमोहयते। तोषयते। आयामयते सर्पान्। आयामयते। मैत्रं। पाययते बटुं। धापयते तीर्थं। वादयते बटुं। वास
यते पांथं। दमयते शिष्यं। आदयते चैत्रेण। रोचयते मैत्रं। नर्तयते नटं॥७४ ईगितः। ईदितां गितां च धातोः फलवति कर्तर्यात्मनेपदंस्यात्। यजते। कुरुते। फ ३९

लवतीत्येव। यजंति। कुर्वंति॥७५ ज्ञोऽनुपसर्गात्। अतः फलवति कर्तर्यात्मनेपदंस्यात्। गां जानीते। फलवतीत्येव। परस्य गां जानाति॥७६ वादः स्यात्। अतः
फलवत्कर्तर्यात्मनेपदंस्यात्। एकोन्तमपवदते। फलवतीत्येव। अपवदति परस्य तः॥७७ समुदाङो यमेरग्रंथे। एभ्यः परात् यमे स्यं च फलवति विषये क
र्तर्यात्मनेपदंस्यात्। संयच्छते। उद्यच्छते। आयच्छते। अग्रंथ इति किं। विकिस्सामुद्यच्छति। फलवतीत्येव। संयच्छति॥७८ पदांतरगम्ये वा। प्रक्रांतसूत्र
पंचके यदात्मनेपदमुक्तं तत्पदांतरगम्ये फले कर्तरि वा स्यात्। स्वं यज्ञं परिमोहयते। परिमोहयति वा। स्वं यज्ञं यजते। यजति वा। स्वां गां जानीते। जाना
ति वा। स्वं शत्रुमपवदते। अपवदति वा। स्वान्व्रीहीन्संयच्छते। संयच्छति वा॥७९ शेषात्परस्मै। यस्मो धातोरेभ्यो येन विशेषेणात्मनेपदमुक्तं ततो
न्यस्मात्कर्तरि परस्मैपदंस्यात्। भवति। अत्ति॥१०० परानोः कृगः। पराऽनुपूर्वात् कृगः कर्तरि परस्मैपदंस्यात्। पराकरोति। अनुकरोति॥१ प्रत्यभ्यतेः
क्षिपः। एभ्यः परात् क्षिपः कर्तरि परस्मैपदंस्यात्। प्रतिक्षिपति। अतिक्षिपति। अभिक्षिपति॥२ प्राद्वहः। अतः कर्तरि परस्मैपदंस्यात्। प्रवहति।
॥३ परेर्मृषश्च। परेः परान्मृषेर्वहेश्च कर्तरि परस्मैपदंस्यात्। परिमृष्यति। परिवहति॥४ व्याङ्परेरमः। एभ्यः पराद्रमेः कर्तरि परस्मैपदं
स्यात्। विरमति। आरमति। परिरमति॥५ वोपात्। उपाद्रमेः कर्तरि परस्मैपदंवास्यात्। भार्यामुपरमति। उपरमते वा॥६ अणिगि प्राणिकर्तृका
नाप्याणिगः। अणिगवस्थायां यः प्राणिकर्तृकोऽकर्मकश्च धातुस्तस्मात् णिगंतात् कर्तरि परस्मैपदंस्यात्। आसयति चैत्रं। अणिगीति किं। स्वयमेवारो
हयमाणं गजं प्रयुंक्ते आरोहयति। प्राणि इति किं। चेतयमानं प्रयुंक्ते चेतयति। अकर्मकादिति किं। व्यापयते श्रीदीनातपः। अनाप्यादिति किं। कटं कारय
ते॥७ चल्याहारार्थेंगुबुधयुधप्रुद्रुस्रुनशजनः। चल्यर्थाहारार्थेभ्य इंगादिभ्यश्च णिगंतेभ्यः कर्तरि परस्मैपदंस्यात्। चलयति। कंपयति। भोजयति। आशा
यति। वित्रमईं सत्रमधमपयति। प्रेक्षयति। बोधयति। पद्मं रविः। योधयति काष्ठानि। द्रावयति राज्ञः। द्रावयं। यः स्रावयति तैलं। ना। ना शयति पापं। जनयति पुण्यं
॥ पा॥ इति यस्याध्यायस्य तृतीयः पादः समाप्तः॥ गुपौधूपविच्छिपणिपनेरायः। एभ्यो धातुभ्यः स्वार्थे आयः स्यात्। गोपायति। धूपायति। विच्छायति। पणाय
ति। पनायति॥ कमेर्णिङ्। कामः स्वार्थे णिङ्स्यात्। कामयते॥२ ऋतेर्डीयः। ऋतः स्वार्थे डीयः स्यात्। ऋतीयते॥३ अशवाविति वा। गुपादिभ्यो आय विषये तु आय
 ॥ श्री दुर्लभराज धर्मसेलः पादारूढ द्वितीयः किं लुब्धशिर्मदिनीपालेर्वीरशिव लब्धे रिवाग्रतः॥१॥

योचास्फः। गोपायिता। गोप्ता कामयिता कमिता। ऋतीयता। अर्तिता॥४॥ गुपूति जुगर्हायां सोसन्तः। गुपायाम् गर्हायां तिजः क्षांतो वर्त्तमाना स्वार्थे सन्‌ स्यात्
जुगुप्सते। तितिक्षते। गर्हा क्षांता विति किं। गोपनं। तेजनं॥५ कितः संशयप्रतीकारा। कितः संशयप्रतीकारार्थो स्वार्थे सन्‌ स्यात्। चिकित्सति। व्याधिं
प्रति। संशयप्रतीकार इति किं। केतयति॥६ शान्दानू मान्बधां निशानार्जवविचारवैरूप्यदीर्घेश्वतः एभ्यो यथासंख्यं निशाना द्यर्थेषु स्वार्थे सन्‌ स्या
त्। दीर्घश्चैषां हि द्वे पूर्वस्यतः॥ शीशांसति। दीदांसति मीमांसते। बीभत्सते। आर्षेक्तिः किं निशानं अवदानं मानयति बाधयति॥७ धातोः कंड्वादेर्यक्
। एभ्यो धातुभ्यः स्वार्थे यक्‌ स्यात्। कंडूयति। कंडूयते। महीयते धातो रिति किं। कंडूः॥८ कृ अनादेरेकस्वरा द्व्यञ्जना द्धलादेर्यङ् वा। गुणक्रियाणामा
श्रयणादीनां क्रियांतराव्यवधानेन साकल्येन संपत्तिः फलातिरेको वा कृ शाब्दं प्रधान क्रियाया विक्लेदादेः क्रियांतराव्यवधानेना वृत्तिरास्ते कृतेन हि
त्रिशार्थहान्तर्धर्मता व्यंजनादारेकस्वरा घड़्वा स्यात्। पापच्यते। बोभ्‌ज ना दरिति किं। इत्यामीक्षते। एकस्वरा दिति किं। सृत्रां चकास्ति। वति किं
। लुनीहि लुनीहीत्येवायं लुनातीत्यादि॥९ अर्यर्त्ति सू त्रिमू त्रिसू व्यश्रूर्णोः। एभ्यो नृशाला नृत्वार्थेच नित्यो यङ्‌ स्यात्। आटाट्यते अरा
र्यते। सोसूच्यते। मा मूत्र्यते। सोसूत्र्यते। आशाश्यते। प्रोर्णोनूयते ॥१०॥ गत्यर्थात्कुटिले अंजनादारकस्वरा द्धन्त्यर्थात् कुटिल एवार्थे वर्त्तमाना
द्धातोर्यङ्‌ स्यात्। चंक्रम्यते। कुटिल इति किं सृत्रां कामति॥११ लुप सद चर जप जभ दह दश गृह्य गर्ह्यार्थे एभ्यो एवैभ्यो यङ्‌ स्यात्। निजगिल्यते
लोलुप्यते। सासद्यते। चंचूर्यते। जंजप्यते। जंजभ्यते। दंदह्यते दंदश्यते। गर्ह्य इति किं साधु जपति। नृत्वं निगिरति॥१२ न गृणाशुभ रुचः। एभ्यो न यङ्‌ स्या
त्। निंद्यं गृणाति नृत्वं शोभते। नृत्वं रोचते॥१३ बहुलं लुप्‌ यङो लुप्‌ बहुलं स्यात्। बोभूयते। बोभवीति। बहुलवचनात् क्वचिन्न भवति लोलूयापा कृ
या॥१४ अचि। घडोः चिपरे लुप्‌ स्यात्। लोलुवः। नेन्यः॥१५ नोत॥ उदं तो द्विधितस्य यङो विलुप्त स्यात्। लोलूयः॥१६ चुरादिभ्यो णिच्‌। एभ्यो धातुभ्यः स्वार्थे णिच्‌ स्या
त्। चोरयति। पदयति॥१७ युजादेर्नवा। एभ्यो धातुभ्यः स्वार्थे णिच्‌ वा स्यात्। योजयति। योजति। सादयति। सहति॥१८ भूङ प्राप्तौ णिङ्‌। भुवः प्राप्त्यर्थे णिङ्‌ स्या
त्। भावयते भवते प्राप्ना विति किं। भवति॥१९ प्रयोक्तृव्यापारे णिग्। कुर्वंतं यः प्रयुंक्ते तद्व्यापाराद्धातो र्णिग्‌ वा स्यात्। कारयति लिशावासयति
४६

राजानमागमयति कं संघातयति पुष्ये णावं दूरयोजयति। उकुरुतस्याः प्रहितो मा दिष्यत्याः सूर्यमुद्गमयति॥२० तमर्हादिच्छायां स्वचन्तस्न नः। योधातुरिषः
कर्मणि एववसमानकर्तृकाः स्व तमर्हस्तस्मादिच्छायामर्थे सन्‌ वा स्यात्। नद्विषपक्वंतानां विकीर्षति जिगमिषति तमर्हा दिति किं। यानेनेच्छति। भुक्तिमिच्छति
मित्रस्य। इच्छाया मिति किं। लो कुं याति न अन इति किं। विकीर्षितुमिच्छति। सदिति किं। कुरुयस्मि प्रति॥२१ द्वितीयाया: काम्यः। द्वितीयांता दिच्छायां काम्यो
वा स्यात्। इदं काम्यति द्वितीयाया इति किं। इच्छ पुत्र॥२२ अमाव्ययोक्यन्‌ वा। मांताव्ययात्सन्निभ्यां द्वितीयांता दिच्छायां क्यन्‌ काम्यश्च वा स्यात्। पुत्रीय
ति। पुत्रकाम्यति। अमाव्ययो दिति किं। इदमिच्छति। स्वरिच्छति॥२३ आधाराद्योपमानादाचारे अमाव्ययादुपमानात् द्वितीयांता दाधारा चाचारे वा क्यन्‌ वा
स्यात्। पुत्रीयति छात्रं। प्रासादीयति कुट्यां॥२४ कर्तुः क्विप्‌ गल्भक्लीवहोडाच्च तिन्‌। कर्तुरुपमानाच्चा प्रच्चाचारे क्विप्‌ वा स्यात्। गल्भक्लीवहोडात्स्म मु
सपवतिक्रियः स्मृति। गल्भते। क्लीवते। होडते॥२५ क्यङ्‌। कर्तुरुपमाना दाचारेर्थे क्यङ्‌ वा स्यात्। हंसायते॥२६ सोवालुक्‌ वा कर्तुरूपमानाद
आचारेर्थे क्यङ्‌ वा स्यात्। अंत्यस्य च सो वा लुक्‌। पयायते। पयस्यते॥ २७ ओजाप्सरसः। आभ्यां कर्तुरुपमानाभ्यामाचारेर्थे वा क्यङ्‌ स्या
त्। सश्च लुक्‌। ओजायते। अप्सरायते॥२८ च्व्यर्थे भृशादेः स्तोः। भृशादे: कर्तुश्च्व्यर्थे क्यङ्‌ वा स्यात्। यथासंभवं स्तो लुक् च। भृशायते। उन्मना
यते। वेहायते। कर्तुरित्येव। अभृशं भृशं करोति। च्व्यर्थे इति किं। भृशो भवति॥२९ डाज्लोहितादिभ्यः षित्‌। डाजंतेभ्यो लोहितादिभ्यश्च कर्तुरभ्यः
च्व्यर्थे क्यङ्‌ षिन्‌ स्यात्। पटपटायति। पटपटायते। लोहितायति। लोहितायते। कर्तुरित्येव। अपटपटां पटपटां करोति। च्व्यर्थे इत्येव। लोहितो भवति॥३०
कष्टकक्षसत्रगहनायपापेक्रमणे। एभ्यश्चतुर्थ्यंतेभ्यः पापचिकीर्षायां क्रमणेर्थे क्यङ्‌ वा स्यात्। कष्टायते। कक्षायते। सत्रायते। गहनायते। वस्तु धीति किं। रिपुः कष्टं क्रामति। पापइति किं। कष्टायतप से क्रामति॥३१ रोमंथाद्व्याप्यादुच्चर्वणे। अस्माद्व्याप्यात् रोमंथा: उद्गी
र्णचर्वितं सुच्चर्वणे अस्मिन्नर्थे रोमंथात्कर्मणः क्यङ्‌ वा स्यात्। रोमंथायते गौः। उच्चर्वण इति किं। कीटो रोमंथं वर्त्तयति॥३२ फेना बाष्पधू
मादुद्वमने। एभ्यः कर्मभ्य उद्वमने र्थे क्यङ्‌ वा स्यात्। फेनायते। ऊष्मायते। बाष्पायते। धूमायते॥३३ सुखादेरनुभवे। साक्षात्कारः सुखादेः कर्म

णः क्यङ् वा स्यात्। सुखायते। दुःखायते॥३४ शब्दादेः कृतो वा। एभ्यः कर्मभ्यः कृतार्थे क्यङ् वा स्यात्। शब्दायते। वैरायते। कलहयति। वैरयति॥
॥३५ तपसः परस्मै च। अस्मात् कर्मणः कृतार्थे क्यन् वा स्यात्। तपस्यति॥३६ नमोवरिवश्चित्रङोर्चासेवाश्चर्ये। एभ्यः कर्मभ्यो यथासंख्यमर्चादिष्वर्थेषु
क्यन् वा स्यात्। नमस्यति। वरिवस्यति। चित्रीयते॥३७ अंगान्निरसने णिङ्। अंगवाचिनः कर्मणो निरसनेर्थे णिङ् वा स्यात्। हस्तयते। पादयते॥३८
पुच्छादुत्परिव्यसने। पुच्छात् कर्मण उदसने पर्यसने व्यसने चार्थे णिङ् वा स्यात्। उत्पुच्छयते। परिपुच्छयते। विपुच्छयते। पुच्छयते॥३९ भांडात्
समाचितौ। भांडात् कर्मणः समाचितार्थे णिङ् स्यात्। संभांडयते। परिभांडयते॥४० चीवरात् परिधानार्जने। अस्मात् कर्मणः परिधानार्जनयोरर्थे णिङ् वा स्या
त्। परिचीवरयते। चीवरयते॥४१ णिज् बहुलं नाम्नः कृगादिषु। कृगादीनां धात्वर्थानां मध्ये नाम्नो णिज् बहुलं स्यात्। मुंडं करोति। मुंडयति। छा
त्रं पटुमाचष्टे पटयति। वृक्षं रोपयति। कृतं गृह्णाति कृतयति॥४ २ व्रताद्भुजितन्निवृत्त्योः। व्रतं शास्त्रोक्तो नियमः। व्रताद्भुजौ तन्नि
वृत्तौ च कृगादिष्वर्थेषु णिज् बहुलं स्यात्। पयो व्रतयति॥४३ सत्यार्थवेदस्याः। एषां णिज् संनियोगेन आस्यात्। सत्यापयति। अ
र्थापयति॥४४ श्वेताश्वाश्वतरगालोडिताह्वरकस्याश्वतरेतकलुक् च। एषां णिज्योगे यथासंख्यमश्वादेः शब्दस्य लुक् स्यात्। श्वेतयति।
अश्वयति। गालोडयति। आह्वरयति॥४५ धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तं। अनेकस्वराद्धातोः परस्याः परोक्षायाः स्थाने
आम् स्यात्। आमंताच्च परः कृभ्वस्तयः परोक्षांता अनुपश्चादनंतरं प्रयुज्यंते। चकासांचकार। चकासां बभूव। चकासामास। अनेकस्वरादिति किं।
पपाच। अनुविपर्यासव्यवहितनिवृत्त्यर्थः। तेन चकार चकासां। ईक्षांचक्रे इत्यादि न स्यात्॥४६ दयायास्कासः। एभ्यो धातुभ्यः परस्याः परोक्षा
या आम् स्यात्। आमंताच्च परः कृभ्वस्तयः परोक्षांता अनुप्रयुज्यंते। दयांचक्रे। दयांबभूव। दयामास। पलायांचक्रे। आसांचक्रे। कासांचक्रे॥४७
गुरु नाम्यादेरनृच्छूर्णोः। गुरुर्नाम्यादिर्यस्तस्माद्धातोर्ऋच्छूर्णुवर्जात् परस्याः परोक्षायां आम् स्यात्। आमंताच्च परः कृभ्वस्तयः परोक्षांता अनुप्रयु
ज्यंते। ईहांचक्रे। ईहांबभूव। ईहामास। गुर्विति किं। इयष। नाम्यादीति किं। निनाय। अनृच्छूर्णोरिति किं। आनर्छ। प्रोर्णुनाव॥४८ जागुषसमिंधेर्नवा। एभ्यः परस्याः ४१
+आनचौ। आदीति किं॥

परोक्षाया आम् वा स्यात्। आमंताच्च परः कृभ्वस्तयः परोक्षांता अनुप्रयुज्यंते। जागरांचकार। जागरांबभूव। जागरामास। जजागार। उषांचकार। उवो
ष। समिंधांचक्रे। समीधे॥४९ ह्रीभीभृहुविदः शित्वच्च। एभ्यः परस्याः परोक्षाया आम् वा स्यात् स च शिद्वत्। आमंताच्च परः कृभ्वस्तयः परोक्षांता अनुप्रयु
ज्यंते। बिभयांचकार। बिभयांबभूव। बिभयामास। बिभाय। जिह्रयांचकार। जिह्राय। जुहवांचकार। जुहाव॥५० वेत्तेः कित्। वेत्तेः परस्याः परोक्षाया
आम् कित् स्यात्। आमंताच्च परः कृभ्वस्तयः परोक्षांता अनुप्रयुज्यंते। विदांचकार। विवेद॥५१ पंचम्याः कृग्। वेत्तेः परस्याः पंचम्याः कित् आम् वा स्यात्।
आमंताच्च परः पंचम्यंतः कृग् अनुप्रयुज्यते। विदांकरोतु। वेत्तु॥५२ सिजद्यतन्यां। अद्यतन्यां परस्यां धातोः परः सिच् स्यात्। अनैषीत्॥५३ स्पृशमृश
कृषतृपदृपो वा। एभ्यो धातुभ्योऽद्यतन्यां सिज् वा स्यात्। अस्प्राक्षीत्। अस्पृक्षत्। अम्राक्षीत्। अमृक्षत्। अक्राक्षीत्। अकृक्षत्। अत्राप्सीत्। अतृपत्। अद्रा
प्सीत्। अदृपत्॥५४ हशिटो नाम्युपांत्याददृशोऽनिटः सक्। नाम्युपांत्याद्धशिटोऽनिटो धातोरद्यतन्यां सक् स्यात्। अधुक्षत्। अलिक्षत्।
हशिट इति किं। अभैत्सीत्। नाम्युपांत्यादिति किं। अधाक्षीत्। अदृशेति किं। अद्राक्षीत्। अनिट इति किं। अकोषीत्॥५५ श्लिषः।
श्लिषो धातोरद्यतन्यां सक् स्यात्। आश्लिक्षत् कन्यां मैत्रः। अनिट इत्येव। अश्ले
षीत्॥५६ नासत्त्वाश्लेषे। श्लिषोऽसत्त्वाश्लेषे वर्तमानात् सक् न स्यात्। उपा
श्लिषज्जतुकाष्ठं। असत्त्वाश्लेष इति किं। व्यत्याश्लिक्षंत मिथुनानि॥५७ लि
हादिभ्यः कर्तर्यात्मनेपदे वा। एभ्यो धातुभ्यः कर्मकर्तर्यद्यतन्यां ङः स्यात्। अवीवरत्।
अलीलिखत्। ... कर्तरीति किं। अकारि चित्रः कटो मैत्रेण॥५८ द्युद्भ्योऽद्यतन्यां। एभ्यो कर्तर्यद्यतन्यां ङ वा स्यात्। अद्युतत्। अद्योतिष्ट। ... कर्तरीत्येव। अधि पात... ॥५९ अस्यतिवक्तिख्यातेरङ्। एभ्यः कर्तर्यद्यतन्यामङ् स्यात्।
अस्थत्। उपास्थत। अवोचत्। आख्यत्। कर्तरीत्येव। ... ॥६० सर्त्तिशास्त्यर्तेर्वा। एभ्यः कर्तर्यद्यतन्यामङ् वा स्यात्। असरत्। अ
सार्षीत्। आरत्। आर्षीत्॥६१ लिपिसिचिह्वः। एभ्यः कर्तर्यद्यतन्यामङ् स्यात्। आह्वत्। अलिपत्। असिचत्॥६२ वात्मने। ह्वादेः कर्तर्यद्यतन्यामात्म
नेपदे वाङ् स्यात्। आह्वत। आह्वास्त। अलिपत। अलिप्त। असिचत। असिक्त॥६३ णिश्रिद्रुस्रुकमः कर्तरि ङः। णिजंतादेः श्र्यादेश्च कर्तरि
+ते॥

× अचल् ×

यदि तन्त्र्या परस्मै पदं स्यात्। अगमत्। अद्युतत्। अस्रवत्। अभुषत्। परस्मै पद इति किं। समगंस्त॥६४ ऋदृदिशुस्तम्भुमुचूम्लुचूम्लुचू स्तुंचू
ङ्गो वा ऋदितः स्यात् एषां कर्तृर्य यदि तन्त्रां परस्मैपदेङ्वा स्यात्। अरुधत्। अरौत्सीत्। अश्वत्। अश्वयीत्। अस्तभत्। अस्तम्भीत्। अम्रुचत्। अम्रुंचीत्।
अम्रुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। अग्रुचत्। अग्रोचीत्। अग्लुचत्। अग्लोचीत्। अस्कुचत्। अस्कोचीत्। अजरत्। अजारीत्॥६५ त्रि
चु तपदस्तदुक्त वा पद्यातः कर्तृर्य द्युतन्त्रा स्वेपरत्रिचू स्यात्। निमित्तस्य च लुक्। उदपादि तप इति किं। उदपन्नातां॥६६ दीपजनबुधिपूरितायिप्या
यो वा। एत्यः कर्तृर्य द्युतन्त्रास्वेपर त्रिद्वास्यात्। तलुक्च। अदीपि। अदीपिष्ट। अजनि। अबोधि। अबुद्ध। अपूरि। अपूरिष्ट। अतायि। अतायिष्ट। अप्यायि। × अजनि ×
अप्यायि × अप्यायिष्ट॥६७ भावकर्मणोः सर्वस्मा द्धातोर्भावकर्म विहित द्युतन्त्रा स्वे त्रिस्यात्। तलुक्च। आसिभाया। अकारिकटः॥६८ स्वरग्रहदृशहन्त्र्य
: स्यसिजाशीः श्वस्तन्यां त्रिड्वा। स्वरान्ताद्ग्रहादेश्च विहिता भावकर्मजा अर्जि स्यात्। दायिष्यते। दास्यते। अदायिषातां। दायिषीष्ट। अदिषातां
दासीष्ट। दायिता। दाता। ग्राहिष्यते। ग्रहीष्यते। अग्राहिषातां। अग्रहीषातां। ग्राहिषीष्ट। ग्रहीषीष्ट। ग्राहिता। ग्रहीता। दर्शिष्यते। द्रक्ष्य × स्यसिजाशीः श्वस्तनीषु ×
ते। अदर्शिषातां। अदृक्षातां। दर्शिषीष्ट। दृक्षीष्ट। दर्शिता। द्रष्टा। घानिष्य ते। हनिष्यते। अघानिषातां। अवधिषातां। घानिषीष्ट। वधिषीष्ट। घा
निता। हन्ता॥६९ क्यः शिति। सर्वस्मा द्धातोर्भावकर्मविहिते शितिक्यः स्यात्। शय्यते। त्वया। क्रियते कटः। शितीति किं। बभूवे॥७० कर्तृर्यनद्भ्यः शव्। अ
दादिवर्जाद्धातोः कर्त्तरि विहिते शिति शव् भवति। कर्तरीति किं। पच्यते। अनद्भ्य इति किं। अत्ति॥७१ दिवादेः श्यः। दिवादेः कर्तृ विहिते शिति श्यः स्यात्। दी
व्यति। जीर्यति॥७२ भ्रासभ्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेर्वा। एत्यः कर्तृ विहिते शिति श्यो वा स्यात्। भ्रास्यते। भ्रासते। भ्लास्यते। भ्लासते। भ्राम्य
ति। भ्रमति। क्राम्यति। क्रामति। क्लाम्यति। क्लमति। त्रस्यति। त्रसति। त्रुट्यति। त्रुटति। लष्यति। लषति। यस्यति। यसति। संयस्यति। संयसति॥७३ कुषिरंजेर्व्याप्ये
वा परस्मै च। आभ्यांव्याप्ये कर्त्तरि शिति श्यः परस्मैपदं वा स्यात्। कुष्यति। कुष्यते वा पादः स्वयमेव। रज्यति। रज्यते वा वस्त्रं स्वयमेव। व्याप्ये
कर्तरीति किं। कुष्णाति पादं रागः। शितीत्येव। अकोषि॥७४ स्वादेः श्नुः। स्वादेः कर्तृविहिते शिति श्नुः स्यात्। सुनोति। सिनोति॥७५ वाक्षः कर्तृ विहिते शिति ४२
श्नुः

श्नुर्वा स्यात्। अक्ष्णोति। अक्षति॥७६ तक्षः स्वार्थे वा। स्वार्थे सन्तक्षणे तक्षः कर्तृ विहिते शिति श्नुर्वा स्यात्। तक्ष्णोति तक्षति। स्वार्थ इति किं। संतक्षति वाक्यं॥७७
स्तंभूस्तुंभूस्कंभूस्कुंभूस्कोः श्ना च। स्तंभ्वादेः सौत्रा धातवः। स्कुनाश्च कर्तृ विहिते शिति श्नाः श्नुश्च स्यात्। स्तभ्नाति। स्तभ्नोति। स्कभ्नाति। स्कभ्नोति। स्कुभ्नाति। स्कुभ्नो + स्तुं ×
भ्नोति। स्कुच्नाति। स्कुच्नोति। स्कुनाति। स्कुनोति॥७८ क्र्यादेः। कर्तृ विहिते शिति श्नाः स्यात्। क्रीणाति। प्रीणाति॥७९ व्यंजनाच्छ्नाहेरानः। व्यंजनान्तात्परस्य श्नाः हे
र्हे स्याने आनः स्यात्। पुषाण। व्यंजनादिति किं। लुनीहि॥८० तुदादेः शः। एत्यः कर्तृ विहिते शिति शः स्यात्। तुदति। नुदति॥८१ रुधां स्वराच्छ्नो नलुक्च। रुधादेः
स्वरात्परः कर्तृ विहिते शिति श्नः स्यात्। तद्योगे च धातोर्नलुक्च। रुणद्धि। छिनत्ति॥८२ कृगूतनादेरुः। कृगस्तनादेश्च कर्तृ विहिते शिति उः स्यात्।
× तनोति × ६ करोति। तनोति। सृजः श्राद्धे त्रिक्यात्मने तथा। सृजेः श्राद्धे यति कर्त्तरि त्रिक्यात्मनेपदानि स्युः। तथा यथा विहितानि। असर्जि। सृज्यते। सृक्ष्यते वा मालां धार्मिकः श्राद्ध इति किं। असृष्ट माल शिशुना॥८४ तपेस्तपः कर्मकात्। तपस्तपः कर्मकात्कर्त्तरि त्रिक्यात्मनेपदानि स्युः। तथा।
तप्यते तपः साधुः। तपइति किं। उत्तपति स्वर्णं स्वर्णकारः। कर्मेति किं। तपः साधुं तपति॥८५ एकधातौ कर्मक्रियया एकाकर्मक्रियाय एकस्मि
न् धातौ कर्मस्थ क्रियया पूर्वदृष्टया एकाच्चलिता संप्रत्यकर्मिका क्रियायस्य तस्मिन्। कर्त्तरि कर्म कर्तृरूपधातोर्ञिक्यात्मनेपदानि स्युः। अकारि
क्रियते। करिष्यते। वा कटः। स्वयमेव। एकधातावितिकिं। पचत्योदनं चैत्रः। सिध्यत्योदनः स्वयमेव। कर्मक्रियेति किं। साधुसिध्यति। एकक्रि
य इति किं। स्ववत्फटकं कुंडिका। अवत्फटकं कुंडिकाया॥ अकर्मक्रिय इति किं। छिद्यमानः कुशूलः पात्राणि भिनत्ति॥८६ पचिदुहेः। एकधातौ कर्मस्थ
क्रियया अकर्मिकया सकर्मिकया वा। एकक्रियकर्त्तरि आभ्यां त्रिक्यात्मनेपदानि स्युः। अपाचि। पच्यते। वा ओदनः स्वयमेव। अदोहि। दुग्धे × अदुग्ध अदुग्धे त्वया ×
धेनुः पयः स्वयमेव॥८७ न कर्मणा त्रिच्। पचिदुहेः कर्मणा योगे नं तराक्ककर्त्तरि त्रिचू नस्यात्। अपाक्त उदुंबरः फलं स्वयमेव। अदुग्ध गो
पयः स्वयमेव। कर्मणेति किं। अपाच्यौदनः स्वयमेव। अनंतराक्ककर्त्तरीत्येव। अपाक्त उदुंबरः फलं वायुना॥८८ रुधः। रुधेर्न नाराक्ककर्त्तरि त्रिचू नस्यात्।
॥ अत्र किरादि ... त्रिवृत्कालाबाः ॥

स्यात्। अरुद्धगोः स्वयमेव॥८९ स्वरडुस्वा। स्वरांता डुहेश्वानंत राक्कर्त्तरिंत्रिवुवानस्यात्। अकृत। अकारिकटः स्वयमेव। अडुग्ध। अदो दिवा गो
रे स्वयमेव॥९० तपः कर्त्तृकुता पेच। तापः कर्मकर्त्तरिकर्त्तर्यकुता पेचार्वे त्रिषूनस्यात्। अवृत प्राकितच। स्वयमेव। अन [illegible] सि [illegible] अ [illegible] वत प्र
वेत्र। अन्वतप्तपापः स्वकर्मणा। कर्त्तृकुता पेचे तिकिं। अता पि। पृथिवी राज्ञ॥९१ णिश्रूकस्यात्मनेपदाकर्मकात्। एणंतान्स्कक्षि [illegible] आत्मनेपद वि
धमवकर्मकेस्यश्चकर्मकर्त्तरिक्तिनस्यात्। अपापच दादनं वेच णामत्रः। अपीपचातो। रनः स्वयमेव। अस्त्राष्ट गोः स्वयमेव। जरवी श्रियन्तदंडः स्वयमे
वाव्यक्त्तां सेधवः स्वयमेव॥९२ सूषार्यसन्क्रिरादिस्यश्च त्रिक्यो। सूषार्थस्यः सन्नंतस्यः किरादिस्यो एयादिस्यश्च कर्मकर्त्तरि त्रिक्यो नस्यातां। अलम
कृतकन्या स्वयमेव। अलंकृस्ततकन्या स्वयमेव। अविकार्षिष्ट विकार्ष तवाकटः स्वयमेवं किरादि। अकीष्टे किरातवा पंशुः स्वयमेव। अग्रीः
ष्टगिरतवा ग्रासः स्वयमेव णि। कारयतकटः स्वयमेव। चारयत गोः स्वयमेव सन्। प्रस्कात गोः स्वयमेव। त्रि। उच्छ्रयतदंडः स्वयमेव।
